षट्चत्वारिंशम्

ISSN 2231-6221

# परिशीलनम्

उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिकी शोधपत्रिका

सामान्य-अङ्कः



उत्तरप्रदेश-संस्कृत-संस्थानम्

(उत्तरप्रदेश-शासनाधीनम्)

षट्चत्वारिंशम्

ISSN 2231-6221

# परिशीलनम्

## उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिकी शोधपत्रिका

संवत् 2079

जून 2022

(सामान्य-अङ्कः)

सम्पादकः

**प्रो. भारतभूषणत्रिपाठी**

आचार्यः व्याकरणविभागस्य

केन्द्रीयसंस्कृतविश्वविद्यालयस्य, लखनऊ-परिसरस्य

विशालखण्डः-4, गोमतीनगरम्

लखनऊ-226010

**उत्तरप्रदेश-संस्कृत-संस्थानम्**

520, इन्दिराभवनम्, लखनऊ-226001

(उत्तरप्रदेश-शासनाधीनम्)

प्रकाशकः
**विनयश्रीवास्तवः**
निदेशकः
उत्तरप्रदेश संस्कृत-संस्थानम्

प्रथमं संस्करणम् - जून 2022

**ISSN 2231-6221**

एका प्रतिः : 50 रूप्यकाणि
वार्षिकमूल्यम् : 100 रूप्यकाणि

प्राप्तिस्थानम्
**विक्रय-विभागः**
उत्तरप्रदेश-संस्कृत-संस्थानम्
520, इन्दिराभवनम्, अशोकमार्गः, लखनऊ-226001
फोन- 0522-2780251
Email- upsanskritsansthanam@yahoo.com
वेवसाइट-www.upsanskritsansthanam.org

मुद्रकः
**शिवम् आर्ट्स**
512/570, दूसरी गली, निशातगंज, लखनऊ
फोन : मो. : 9415061690

# विषयानुक्रमणिका


| | | |
|---|---|---|
| अध्यक्षीयम् | | |
| निदेशकीयम् | | |
| सम्पादकीयम् | आचार्य ओमप्रकाशपाण्डेयः | 1 |
| 1. अमृतमहोत्सवावसरे भारतस्य स्वातन्त्र्यसंघर्षगाथा | प्रो. अशोकचन्द्रगौड़शास्त्री | 5 |
| 2. संस्कृतभाषायां स्वराघातविमर्शः | प्रो. अवनीश अग्रवालः | 25 |
| 3. हरिप्रियामहत्त्वम् | प्रो. भारतभूषणत्रिपाठी | 32 |
| 4. रुच्यर्थानां प्रीयमाणः | डा. प्रफुल्लगड़पालः | 36 |
| 5. दिव्यावदानस्य हिन्द्यनुवादे अर्थगताः समस्याः समाधानानि च (वीतशोकावदानस्य विशेषसन्दर्भे) | | |
| 6. रामायणे सौन्दर्यस्यावधारणा | डॉ. रीतातिवारी | 49 |
| 7. विविधशास्त्राभिमतकरणतृतीयार्थविमर्शः | डा. दिव्यचेतनब्रह्मचारी | 56 |
| 8. काव्यगुणक्षेत्रे शब्दार्थयोः विमर्शः | डॉ. रुद्रनारायणनरसिंहमिश्रः | 65 |
| 9. सत्कायदृष्टेः प्रहाणम् : पञ्चस्कन्धानां विशेषसन्दर्भे | डॉ. कृष्णा कुमारी | 75 |
| 10. श्रीगोविन्दकृतरत्नावलीद्युतिटीकायाः द्वितीयाङ्कः- | डॉ. सुमनचन्द्रपन्तः 'सुमन्तः' | 85 |
| 11. श्रीशिङ्गभूपालमते बुद्ध्यारम्भेषु रीतिवृत्ति-प्रवृत्तयः | डॉ. नीलम | 95 |
| 12. महाकविकालिदासस्य अभिज्ञानशाकुन्तलनाटके स्त्रीपात्राणां सौन्दर्यम् | डॉ. सुमेरीलालः | 105 |
| 13. नेपालीव्याकरणे संस्कृतव्याकरणस्य प्रभावः | डॉ. प्रदीपशर्मालुईटेलः | 118 |
| 14. पाणिनिनेपालीव्याकरणयोः कर्मकारकस्य समीक्षणम् | श्रीखेमलालशर्मा | 129 |
| 15. नृपतिकुंभदृष्ट्या शब्दार्थ निरूपणम् | अनुपम पाण्डेयः | 133 |
| 16. शिक्षाग्रन्थेषु आचारमीमांसा | श्यामसुन्दरः | 141 |

# विविधशास्त्राभिमतकरणतृतीयार्थविमर्शः

– वाचस्पतिः डा० दिव्यचेतनब्रह्मचारी

इस निबन्ध में लेखक ने व्याकरण शास्त्र के करण तृतीयार्थ का विवेचन विविध शास्त्रों के मतों से प्रस्तुत किया है। जगदीश के मत से शुरू कर लेखक ने इस निबन्ध में गदाधर भट्टाचार्य, गागाभट्ट और खण्डदेव के मत में करणतृतीयार्थ की विवेचना की है।

''कणादं पाणिनीयं च सर्वशास्त्रोपकारकम्'' इत्याभाणकं संस्कृतसंसारेस्मिन् प्रसिद्धवाक्यं को न जानाति तत्रादौ कणादमतमवलम्बनमात्राश्रितानां बहूनां मध्ये शोभमानमान्यानां जगदीशवर्याणां मते करणे समागततृतीयायाः करणत्वमर्थो वर्तते। यतोहि– करणे तृतीयाविधायकं सूत्रं वर्तते कर्तृकरणयोस्तृतीया इति। अत्र च सूत्रे जगदीशमते कर्तृकरणयोः, इत्यत्र भावप्रधाननिर्देशो वर्तते। तथा च सूत्रस्यार्थो भवति– कर्तृत्वे करणत्वे च तृतीया विभक्तिः भवति। अर्थात् कर्तृत्वबोधिका करणत्वबोधिका तृतीया विभक्तिः भवति। इदं करणत्वं च किमिति जिज्ञासायामाह–

**योऽर्थो विकरणाक्तस्य धातोरर्थे तृतीयया।**

**बोध्यते करणं नाम कारकं तदिहोच्यते[1]।।**

अन्वयः– तृतीयया विकरणाक्तस्य धातोरर्थे यो अर्थः बोध्यते तदिह कारकं नाम करणम् उच्यते।

कारिकार्थमपि स्वयमेवाह ग्रन्थकारः– **''सविकरणस्य यद्धातोरुपस्थाप्ययादृशार्थे तृतीयया यादृशः स्वार्थो अनुभाव्यते स तद्धातूपस्थाप्यतादृशक्रियायाः करणसंज्ञकं कारकमुच्यते। अर्थात् विकरणविशिष्टस्य यद्धातोः उपस्थाप्ये यस्मिन्नर्थे तृतीयया यः स्वार्थः अनुभाव्यते सोऽर्थः तद्धातोः उपस्थाप्ये तस्मिन्नर्थे करणसंज्ञकं कारकमुच्यते''**[2] । यथा मैत्रः दात्रेण काष्ठं छिनत्ति इत्यत्र दात्रनिष्ठव्यापारजन्यो यो हि काष्ठनिष्ठद्वैधीभावः तदनुकूलव्यापारानुकूलकृतिमान् मैत्रः, इत्यर्थो जायते। दात्रत्वावच्छिन्नस्वनिष्ठव्यापारनिरूपित्वसम्बन्धा-वच्छिन्नप्रकारतानिरूपिताकरणत्वनिष्ठाविशेष्यतातत्समानाधिकरणस्वरूपसम्बन्धावच्छिन्न-जन्यत्वत्वाच्छिन्नप्रकारतानिरूपिताफलनिष्ठाविशेष्यताअथ च निष्ठत्वाच्छिन्नप्रकारतानिरूपितात-फलनिष्ठविशेष्यतातत्समानाधिकरणजनकत्वसम्बन्धावच्छिन्नफलत्वावच्छिन्नप्रकारतानिरूपिता

व्यापारत्वावच्छिन्नविशेष्यतातत्समानाधिकरणानुकूलत्वसम्वधावच्छिन्नव्यापारत्वावच्छिन्नप्रकारतानिरूपित -कृतित्वाच्छिन्नविशेष्यतातत्समानाधिकरणसमवायसम्वन्धावच्छिन्नकृतित्वाच्छिन्नप्रकारतानिरूपिता प्रथमार्थ मैत्रत्वाच्छिन्नविशेष्यता तादृशविशेष्यताशालिबोधो जायते मैत्र: दात्रेण काष्ठं छिनत्ति।

अत्र विकरणाक्तस्य छिद्धातोरर्थे द्वैधीभावे दात्रपदोत्तरतृतीयया स्वार्थजन्यत्वादि: बोध्यते, अत: तदेव जन्यत्वादि करणं कारकं वर्तते। चैत्र: घटत्वेन घटं जानाति। इत्यत्र घटत्वनिष्ठ-प्रकारितानिरूपितप्रकारितावत् घटनिष्ठविशेष्यतानिरूपितविशेष्यितावत् ज्ञानं तदाश्रय: चैत्र:, इति बोधो जायते। तथा चात्र विकरणविशिष्टस्य जानाते: अर्थे ज्ञाने घटत्वपदोत्तरतृतीयया यो हि स्वार्थ: प्रकारित्वादि: प्रतिपाद्यते, अत: तद्धातूपस्थाप्ये ज्ञानरूपे अर्थे स: प्रकारित्वारूपार्थ एव करणं कारकमिति भाव:। तथा चोक्तं जगदीशेन दात्रेण छिनत्ति, घटत्वेन जानाति इत्यादौ धात्वर्थे छिदायां दात्रस्य व्यापारद्वारा जन्यत्वादि ज्ञानादौ च घटत्वादे: प्रकारित्वादिकं तृतीयया बोध्यते, तदेव तत्र करणत्वम्।।[3]

अथ करणलक्षणे सविकरणस्येति पदं किमर्थं प्रदत्तम्, केवलं यद्धातोरुपस्थाप्ययादृशार्थे तृतीयया यादृश: स्वार्थो अनुभाव्यते स तद्धातूपस्थाप्यतादृशक्रियाया: करणसंज्ञकं कारकम् इत्येवोच्यतामिति तु नैव वक्तव्यम्, तथा सति चैत्रेण पक्वम् अन्नम्, इत्यादौ तृतीयार्थ: कर्तृत्वं तत्र चैत्रस्य वृत्तित्वसम्बन्धेनान्वयो भवति, कर्तृत्वस्य च धात्वर्थे व्यापारे जन्यत्वसम्बन्धेनान्वयो भवति, तथा चोक्तवाक्यात् चैत्रवृत्तिकर्तृत्वजन्यव्यापारजन्य-विक्लित्तिमदन्नम्, इति बोधो भवति। एवं चात्र पच्धातूपस्थाप्ये व्यापाररूपे अर्थे चैत्रपदोत्तरतृतीयया स्वार्थ: कर्तृत्वमनुभाव्यते, अतस्तस्यापि करणत्वापत्ति:, तद्वारणाय सविरणस्येति पदं प्रदत्तं लक्षणे तथा च न दोष:, चैत्रेण पक्वमित्यादौ धातो: विकरणरहितत्वात्।

अथ हस्तेन रुणद्धि, इत्यादौ हस्तस्य करणत्वं न स्यात् धातो: सविकरणत्वाभावादिति तु नैव वक्तव्यम्, अत्रापि श्नं विकरणं वर्तते, तस्मान्नाव्याप्ति:। तथा चाह जगदीश:- "हस्तेन रुणद्धीत्यादौ विकरणान्तभिन्नोऽपि रुधादिधातुर्विकरणाक्त एव।।[4] एवं घृतेन अत्ति जुहोति, इत्यादावपि विकरणं नास्ति विकरणस्य लुका लुप्तत्वादित्यपि नैव वक्तव्यम्, एवं भूतस्थलेषु प्रतिसन्धीयमानं विकरणमादाय समन्वय: कर्तव्य:। तथा चोक्तं जगदीशेन- **घृतेनात्ति, जुहोतीत्यादावपि लुप्तमेव प्रतिसन्धीयमानमस्तीति मतेनेदं नातस्तत्र घृतादे: करणत्वव्याहति:।।**[5]

**अत्रायं विशेष:-**

अथ यदि एवं भूतं परिष्कृतं करणत्वं स्वीक्रियते तच्च कुत्रचित् प्रतियोगित्वरूपं

कुत्रचिच्च जन्यत्वादिरूपमिति चोच्यते तदा चक्षुरादीनामुक्तकरणत्वाभावात् चक्षुः करणम्, अनुमितौ व्याप्तिज्ञानं करणम्, एवं व्यवहारः कथं स्यादिति चेच्छृणु करणशब्दस्तु व्यापारवज्जनकस्य वाचको वर्तते। एवं च घटं पश्यामि, इत्यादौ घटप्रत्यक्षजनने चक्षुः संयोगसम्बन्धरूपव्यापारवदपि वर्तते, किञ्च ज्ञानस्य जनकोऽपि तस्मात्तस्य करणत्वेन व्यवहारो भवति। एवं परामर्शरूपव्यापारद्वारा व्याप्तिज्ञानस्य अनुमितिं प्रति जनकत्वमस्तीति कृत्वा अनुमितौ व्याप्तिज्ञानं करणमिति व्यवहारः। एवं संस्काररूपव्यापारद्वारा अनुभवस्य स्मृतिजनकत्वमस्तीति कृत्वा स्मृतौ अनुभवः करणमिति व्यवहारः। शरीरात्मादीनान्तु तादात्म्येनैव ज्ञानादिजनकत्वान्न ज्ञाने शरीरं करणमित्यादिव्यवहारः। तथा चाह जगदीशः- **''करणशब्दस्तु व्यापारप्रत्यासत्या जनकस्य वाचकः। चाक्षुषादौ चक्षुरादिः संयोगेन, अनुमित्यादौ व्याप्तिज्ञानादिः परामर्शादिना, स्मृत्यादावनुभवादिः संस्कारादिना, स्वव्यापारेणैव सम्बन्धेन हेतुः। शरीरात्मप्रभृतयस्तु ज्ञानादौ तादात्म्येनैव, अतो न तेषां तत्र करणत्वप्रसङ्गः''**[६]।

अथ करणशब्दो व्यापारवज्जनकस्य वाचको भवतीति कृत्वा अनुमितौ व्याप्तिज्ञानादेः करणत्वं साधितम्, ज्ञानादिकं प्रति शरीरात्मादीनां करणत्वं च निराकृतम्। परन्तु तन्न साधुः आत्मानम् आत्मना वेत्सि, इत्यादौ ज्ञानादिकं प्रति आत्मनः करणप्रतिपादनात्। एवं च ज्ञानादिकं प्रति आत्मादेः करणत्वमस्त्येवेति प्रोच्यते चेत् सत्यम्, तत्सिद्ध्यर्थं तदनुकूलमेव करणलक्षणं प्रोच्यते। तथाहि- फलायोगव्यवच्छिन्नं कारणं करणम्, फलोपधायकं कारणं वा करणम् इति। अत्र क्रमेणोभयोः तात्पर्यं प्रस्तूयते। तत्र फलायोगव्यवच्छिन्नं कारणं करणमित्यस्य तात्पर्यं वर्तते- फलस्य अयोगेन असम्बन्धेन व्यवच्छिन्नं शून्यं यत्कारणं तत्करणम्, एवं च आत्मना जानाति, इत्यादौ आत्मनि व्यापाराभावेऽपि आत्मा ज्ञानरूपफलस्य अयोगेन शून्यं वर्तते, अर्थात् फलवदस्तीति कृत्वा तस्य करणत्वं सिद्ध्यति। फलोपधायकं कारणं करणम् इत्यस्यार्थो वर्तते फलजनकं कारणं करणमिति। तथा च आत्मादेः ज्ञानादिजनकत्वात् तत्प्रति आत्मादेः करणत्वं सिध्यतीति भावः। तथा चाह जगदीशः- ''फलायोगव्यवच्छिन्नं फलोपधायकं वा कारणमेव करणं, ज्ञानादावात्मादेः करणत्वस्येष्टत्वात्''[७] ।

**अत्र शाब्दबोधः**

मैत्रः दात्रेण छिनत्ति, इत्यत्र छिदिधातोः द्वैधीभवनानुकूलव्यापारो वाच्यः। तिबर्थः कृतिः। दात्रपदोत्तरतृतीयार्थः करणत्वम्, तच्चात्र जन्यत्वरूपम्। तत्र प्रकृत्यर्थस्य निष्ठव्यापारनिरूपितत्व-सम्बन्धेनान्वयः। जन्यत्वस्य च द्वैधीभावरूपे फले अन्वयः। फलस्य व्यापारे व्यापारस्य च कृतौ, कृतेश्च प्रथमान्तार्थे अन्वये सति चोक्तवाक्यात् काष्ठनिष्ठव्यापारनिरूपितजन्यतावद्द्वैधीभवनानुकूल-

व्यापारानुकूलकृतिमान् मैत्रः इति बोधो भवति। दात्रत्वावच्छिन्नस्वनिष्ठव्यापारनिरुपित्वसम्बन्धावच्छिन्न-प्रकारतानिरूपिताकरणत्वनिष्ठाविशेष्यतातत्समानाधि-करणस्वरुपसम्बन्धावच्छिन्नजन्य-त्वत्वाच्छिन्नप्रकारतानिरूपिताफलनिष्ठाविशेष्यतातत्समानाधिकारणजनकत्वसम्बन्धावच्छिन्न-फलत्वावच्छिन्नप्रकारतानिरूपिताव्यापारत्वावच्छिन्नविशेष्यतातत्समानाधिकरणानुकूलत्व सम्बधावच्छिन्नव्यापारत्वावच्छिन्नप्रकारतानिरूपितकृतित्वाच्छिन्नविशेष्यतातत्समानाधिकरणसमवाय-सम्बन्धावच्छिन्नकृतित्वाच्छिन्नप्रकारतानिरूपिताप्रथमार्थमैत्रत्वाच्छिन्नविशेष्यतातादृशविशेष्यताशालि-बोधो जायते मैत्रः दात्रेण छिनत्ति।

गदाधरमते करणतृतीयायाः करणत्वमर्थो वर्तते। तथा चोक्तं[८] - गदाधरेण **''काष्ठेन पचति इत्यादौ करणत्वं तृतीयार्थः''**[९] । अयं भावः- कर्तृकरणयोस्तृतीया इति सूत्रेण कर्तृत्वे करणत्वे च तृतीया अनुशिष्टा । तत्र कर्तृकरणपदयोः भावप्रधाननिर्देशरूपत्वात्। एवं च चैत्रः काष्ठेन पचतीत्यादौ काष्ठपदोत्तरतृतीयायाः करणत्वमित्यर्थः। करणत्वं च किमिति जिज्ञासायामाह गदाधरः- **''तच्च व्यापारवत्कारणत्वम्''**[१०] इति। एवं च व्यापारवत्कारणत्वं करणस्य लक्षणं वर्तते। तत्र **''व्यापारत्वं नाम करणजन्यत्वे सति करणजन्यफलजनकत्वम्''**[११]। **''कारणत्वं च कार्यनियतपूर्ववृत्तित्वम्।।**[१२] । यथा चैत्रः काष्ठेन पचतीत्यादौ काष्ठः करणं वर्तते, अत्र काष्ठे ज्वलनादिव्यापारो वर्तते, ज्वलनस्य हि काष्ठजन्यत्वे सति काष्ठजन्यविक्लित्तिजनकत्वात्, तस्मात्काष्ठस्य व्यापारवत्त्वमस्ति। किञ्च विक्लित्तिरूपकार्य-नियतपूर्ववृत्तित्वमपि काष्ठस्य वर्तते, अतस्तत्र कारणत्वमपि वर्तते। अतो व्यापारवत्कारणत्वात् काष्ठं करणमिति भावः।

परन्तु एवं सति मैत्रः पचतीत्यादौ कर्तुरपि करणत्वापत्तिः, तस्य चुल्लीनिक्षेपादिव्यापारवत्वे सति पाकरूपकार्यनियतपूर्ववृत्तित्वात्, अत एतद्दोषवारणाय लक्षणघटकव्यापारपदे कर्तृव्यापाराधीनत्व-विशेषणं देयम्, तथा च लक्षणं भविष्यति कर्तृव्यापाराधीनव्यापारवत्कारणत्वं करणत्वमिति। एवं च मैत्रः काष्ठेन पचतीत्यादौ मैत्रस्य व्यापारः कर्तृव्यापाराधीनो नास्ति, अतस्तत्र नातिव्याप्तिः, काष्ठस्य व्यापारस्तु चैत्रवृत्तिव्यापाराधीनो वर्तते, अतो नाव्याप्तिः। चोक्तं च गदाधरेण- **''तच्च व्यापारवत्कारणत्वं, व्यापारे कर्तृव्यापाराधीनत्वं निवेशनीयम्, अन्यथा कर्तुरपि करणतापत्त्या चैत्रश्चैत्रेण पचति, काष्ठं चैत्रेण पचति इत्यादिप्रयोगापत्तेः''**[१३] ।

अथैवमपि कर्तरि लक्षणस्यातिव्याप्तिः वर्तत एव। तथाहि- चैत्रे कर्तरि कृत्यादिव्यापारो वर्तते, चेष्टादिव्यापारोऽपि वर्तते। तत्र चेष्टादिव्यापारः कृत्यादिव्यापाराधीनो वर्तते, अतस्तत्र दोषो वर्तत एवेति चेदुच्यते- एतद्दोषवारणाय लक्षणे कर्तरि स्वभिन्नत्वविशेषणमपि देयम्, तथा च लक्षणं भविष्यति स्वभिन्नकर्तृव्यापाराधीनव्यापारवत्कारणत्वं करणत्वमिति। यस्य करणत्वमुपपादनीयं

तत्स्वम्। यथा चैत्रः काष्ठेन पचतीत्यादौ स्वपदार्थः काष्ठः, तद्भिन्नः कर्ता चैत्रः तदीयव्यापारः अग्निप्रज्वालनादिव्यापारः तदधीनव्यापारः काष्ठस्य तद्वत्काष्ठम्, किञ्च कारणमपि वर्तते, अतस्तत्करणमिति भावः। कर्तुस्तु न करणत्वम्, यतोहि- चैत्रः काष्ठेन तण्डुलं पचतीत्यादौ चैत्रस्य कर्तुः चैत्रवृत्तिचेष्टादिव्यापारस्य चैत्रवृत्तिकृत्यादिव्यापाराधीनत्वे सत्यपि स्वभिन्नकर्तृ-व्यापाराधीनत्वं नास्ति, अतस्तत्र न दोष इति भावः। काष्ठव्यापारस्य च काष्ठभिन्नचैत्रवृत्ति-व्यापाराधीनत्वं वर्तते, अतो नाव्याप्तिः। एवं चात्र कर्तृविशिष्टव्यापारवत्कारणत्वं करणत्वम्, वैशिष्ट्यञ्च स्वव्यापारप्रयोज्यत्वम्, स्वावृत्तित्वम्, इत्युभयसम्बन्धेनेति बोध्यम्।

अथैवमपि यत्रैकैव पाकक्रिया चैत्रेण काष्ठनिक्षेपेण सम्पाद्यते मैत्रेण च तुषनिक्षेपेण सम्पाद्यते तत्र चैत्रस्तुषैः मैत्रः काष्ठैः पचतीति प्रयोगप्रसङ्गः, चैत्रकर्तृकत्वतुषकरणकत्व-मैत्रकर्तृकत्वकाष्ठकरणकत्वानाम् एकस्यां पाकक्रियायां सत्त्वात्, इति चेदुच्यते एतद्दोषवारणाय लक्षणे समभिव्याहृत इति पदस्य निवेशः क्रियते। तथा च लक्षणं भवति- समभिव्याहृतस्वभिन्न-कर्तृव्यापाराधीनव्यापारवत्कारणत्वं करणत्वमिति। प्रकृते तुषव्यापारे समभिव्याहृतचैत्रव्यापाराधीनत्वं नास्ति, अपितु मैत्रव्यापाराधीनत्वं वर्तते, काष्ठे च मैत्रव्यापाराधीनत्वं नास्ति अपितु चैत्रव्यापाराधीनत्वं वर्तते, अतः चैत्रस्तुषैः मैत्रः काष्ठैः पचतीति प्रयोगो नैव भवति, अपितु चैत्रः काष्ठैः मैत्रः तुषैः पचतीति प्रयोगो भवतीति भावः।

अथैवमपि सति काष्ठेन पचतीत्यादौ काष्ठे करणे तृतीया न स्यात्। यतो हि- प्रकृते कर्तृवाचकपदाभावेन समभिव्याहृतस्वभिन्नकर्तृव्यापाराधीनव्यापारवत्कारणत्वं काष्ठस्य वक्तुं नैव शक्यते इति चेदुच्यते, काष्ठेन पचतीत्यादौ कर्त्रसमभिव्याहारस्थले धनेन कुलम्, विद्यया यशः इत्यादिवत् हेतौ इति सूत्रेण हेतौ तृतीयेति भावः। तथा चाह गदाधरः- **"न च समभिव्याहृतकर्त्रन्तरभावेण तृतीयार्थत्वे कर्त्रसमभिव्याहारस्थले करणे तृतीयाया अप्रयोगापत्तिरिति वाच्यम्। तत्रापि हेतौ इति सूत्रेण हेतुतामात्रार्थकतृतीयासम्भवात् धनेन कुलम्, विद्यया यशः इत्यादिवत्"**[१४] ।

अथवा समभिव्याहृतकर्तृव्यापाराधीनत्वे व्यापारवत्कारणत्वे च तृतीयायाः शक्तिद्वयं स्वीकर्तव्यम्। तत्र कर्तृसमभिव्याहारस्थले उभयोरर्थयोः प्रतीतिः भवति, कर्त्रसमभिव्याहारस्थले व्यापारवत्कारणत्वमात्रं प्रतीयते, इति स्थितिः। तथा चाह गदाधरः- **"वस्तुतः समभिव्याहृतकर्तृव्यापाराधीनत्वे व्यापारवत्कारणत्वे च तृतीयायाः शक्तिद्वयम्। कर्त्रसमभि-व्याहारस्थले व्यापारवत्कारणत्वमात्रं प्रतीयते, कर्तृसमभिव्याहारस्थले व्यापारे तद्व्यापाराध ीनत्वमपीति सामञ्जस्यम्"**[१५] ।

**अत्र शाब्दबोधः तृतीयार्थान्वयप्रकारश्च**

चैत्रः काष्ठेन पचति। इत्यत्र पचिधातोः विक्लित्तिः, अधिश्रयणादिव्यापारश्चार्थः। काष्ठपदोत्तरतृतीयायाः समभिव्याहृतकर्तृव्यापाराधीनव्यापारवत्कारणत्वमर्थः तत्र काष्ठस्य वृत्तित्वसम्बन्धेनान्वयः, तृतीयार्थस्य च धात्वर्थफले स्ववृत्तिव्यापारजन्यत्व-सम्बन्धेनान्वयः। धात्वर्थस्य फलस्य व्यापारे जनकत्वसम्बन्धेनान्वयः, व्यापारस्य तिबर्थकृतौ जनकत्वसम्बन्धेनान्वयः, तिबर्थकृतेश्च चैत्रे आश्रयत्वसम्बन्धेनान्वयो भवति। तथा चोक्तवाक्याद् काष्ठवृत्तिसमभिव्याहृतकर्तृव्यापाराधीन-व्यापारवत्कारणत्व-निष्ठव्यापारजन्यविक्लित्तिजनकव्यापारजनककृतिमान् चैत्रः, इति बोधो भवतीति भावः। काष्ठत्वावच्छिन्नस्वनिष्ठव्यापारनिरूपित्वसम्बन्धावच्छिन्नप्रकारतानिरूपिताकरणत्व-निष्ठाविशेष्यता तत्समानाधिकरणस्वरूपसम्बन्धावच्छिन्नजन्यत्वत्वाच्छिन्नप्रकारतानिरूपिता-विक्लित्तिरूप-फलनिष्ठाविशेष्यता तत्समानाधिकारणजनकत्वसम्बन्धावच्छिन्नफलत्वा-वच्छिन्नप्रकारता-निरूपिताव्यापारत्वावच्छिन्नविशेष्यता तत्समानाधिकरणानुकूलत्वसम्बधा-वच्छिन्नव्यापारत्वावच्छिन्नप्रकारतानिरूपितकृतित्वाच्छिन्नविशेष्यता तत्समानाधिकरणसमवायसम्बन्धा-वच्छिन्नकृतित्वाच्छिन्नप्रकारतानिरुपिताप्रथमार्थचैत्रत्वाच्छिन्नविशेष्यता

**तादृशविशेष्यताशालिबोधो जायते चैत्रः काष्ठेन पचति ।**

काष्ठेन पच्यते तण्डुलः। इत्यत्र च तृतीयार्थः व्यापारवत्कारणत्वमर्थः, तत्र काष्ठस्य वृत्तित्वसम्बन्धेनान्वयः, करणत्वस्य च स्ववृत्तित्वसम्बन्धेन धात्वर्थे फले अन्वयः व्यापारस्य च धात्वर्थफले जन्यत्वसम्बन्धेनान्वयः ते प्रत्ययस्य चात्र आश्रयत्वमर्थः तस्य स्वरूपसम्बन्धेन तण्डुले अन्वयः। तथा चोक्तवाक्यात् काष्ठवृत्तिव्यापारवत्कारणत्वनिष्ठव्यापारजन्या व्यापारजन्या च या विक्लित्तिः तदाश्रयः तण्डुलः, इति बोधो भवति। विशेषस्तु वृत्तित्वसम्बन्धावच्छिन्न-कांष्ठत्वावच्छिन्नकाष्ठनिष्ठप्रकारतानिरूपिता तृतीयार्थव्यापारवत्कारणत्वनिष्ठविशेष्यता-तत्समानाधिकरणवृत्तित्वसंसर्गावच्छिन्नप्रकारतानिरूपिता- व्यापारत्वाच्छिन्नविच्छिन्नविशेष्यतासमानाधि-करणजन्यत्वावच्छिन्नप्रकारतानिरूपिताधात्वर्थत्वाच्छिन्नफलत्वाच्छिन्नविशेष्यतातत्समानाधिकरण-प्रकारतानिरूपिताप्रत्ययार्थतिङर्थनिष्ठविशेष्यतातत्समानाधिकरणप्रकारतानिरूपिताप्रथमान्तार्थ-तण्डुलनिष्ठाविशेष्यता तादृशविशेष्यताशालिशाब्दबोधो जायते काष्ठेन पच्यते तण्डुलः इति वाक्यात्।

**अथ गागाभट्टाभिमतकरणतृतीयार्थविमर्शः-**

गागाभट्टमते करणे समागततृतीयायाः करणत्वमर्थो वर्तते। यतो हि- करणे तृतीयाविधायकं

सूत्रं वर्तते कर्तृकरणयोस्तृतीया इति। अत्र च सूत्रे गागाभट्टमते कर्तृकरणयोः, इत्यत्र भावप्रधाननिर्देशो वर्तते। तथा च सूत्रस्यार्थो भवति- कर्तृत्वे करणत्वे च तृतीया विभक्तिः भवति। तस्मादुक्तप्रामाण्यात् सिध्यति करणत्वं तृतीयार्थः। अत एवाह गागाभट्टः **''अथ कर्तृत्वं करणत्वं च तृतीयार्थः''**[१६]। करणत्वं च किमिति जिज्ञासायामाह- गागाभट्टः:- **''करणत्वं तु साधकतमत्वम्''**[१७] । साधकतमं करणम् इति सूत्रात्। साधकतमत्वं च किमिति जिज्ञासायामाह- त्रीणि लक्षणानि गागाभट्टः उक्तवान्- **''साधकतमत्वं चाव्यवधानेन फलजनकव्यापारवत्कारणत्वम्। फलायोग-व्यवच्छिन्नत्वं वा। फलोद्देशप्रवृत्तकर्तृव्यापारोपकार्यत्वं वा''**[१८]।

अत्र क्रमेण त्रयाणां लक्षणानां भावः प्रस्तूयते। तत्र कः पक्षःसाधुरिति च विचार्यते। तथाहि- प्रथमं लक्षणं वर्तते- अव्यवधानेन फलजनकव्यापारवत्कारणत्वम्। यथा रामः बाणेन वालीं हन्ति, इत्यत्र हन्तेः प्राणवियोगानुकूलव्यापारोऽर्थः, अत्र प्राणवियोगः फलम्, तस्य अव्यवधानेन जनको बाणो वर्तते, किञ्च व्यापारवत्कारणमपि वर्तते, अतस्तत्करणमिति भावः।

किन्तु एवं सति आत्मना जानाति, इत्यादावात्मनः करणत्वं न स्यात्, तस्य व्यापारवत्कारणत्वाभावात्। अतः करणस्य द्वितीयलक्षणं प्राह गागाभट्टः- तच्च फलायोगव्यवच्छिन्नत्वं करणत्वमिति। अर्थात् फलस्य अयोगेन असम्बन्धेन व्यवच्छिन्नं शून्यं यत्कारकं तत्करणम्, एवं च आत्मना जानाति, इत्यादौ आत्मनि व्यापाराभावेऽपि आत्मा ज्ञानरूपफलस्य अयोगेन शून्यं वर्तते, अर्थात् फलवदस्तीति कृत्वा तस्य करणत्वं सिद्धति। तथा चोक्तं गागाभट्टेन- तेनात्मना जानातीत्यादावात्मनोऽपि करणत्वमविरुद्धम्।

परन्तु एतल्लक्षणानुसारं चैत्रः कुठारेण दात्रं छिनत्तीत्यादौ कुठारस्य करणत्वं न स्यात्, कुठारस्य छिदारूपस्य फलस्य अयोगेन शून्यत्वाभावात्, अर्थात् फलासम्बन्धित्वात्। अतस्तृतीयं लक्षणं प्राह गागाभट्टः- फलोद्देशप्रवृत्तकर्तृव्यापारोपकार्यत्वं करणत्वमिति। एतस्य तात्पर्य वर्तते फलमुद्दिश्य प्रवृत्तस्य कर्तुः यो हि व्यापारः, तस्य उपकार्यत्वम्, अर्थात् आश्रयत्वं करणत्वम्, यथा चैत्र कुठारेण दात्रं छिनत्ति इत्यादौ छेदनरूपं फलमुद्दिश्य प्रवृत्तस्य चैत्रस्य यो हि उद्यमननिपातनरूपो व्यापारः तस्य आश्रयः कुठारो वर्तते, अतस्तस्य करणत्वं सिध्यतीति भावः। एषु त्रिषु लक्षणेषु तृतीयं लक्षणं साधु वर्तते। यतो हि- तृतीयलक्षणेन रामेण बाणेन हतो वाली, इत्यादौ बाणस्य, आत्मना जानाति, इत्यादौ आत्मनः, कुठारेण दात्रं छिनत्ति, इत्यादौ कुठारादीनां च करणत्वं सिध्यतीति कृत्वा अव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यत्वात्।

**अथ खण्डदेवाभिमतकरणतृतीयार्थविमर्शः-**

खण्डदेवमतेऽपि करणतृतीयार्थः करणत्वम्। करणत्वं च तन्नये इदं करणम् इदं करणम् इति प्रतीतिसिद्धौ जातितुल्यः कश्चन अखण्डो धर्मः इति सः स्वीकरोति। अत एव भाट्टतन्त्ररहस्ये अन्येषां मतं तिरस्कृत्य स्वमतं प्रतिपादितं खण्डदेवेन तत्र हि वदति सः- **"अतः करणत्वं करणं करणम् इत्याद्यनुगतप्रतीत्या अखण्डोपाधिरूपमेव करणत्वम्, कारणत्वादिवत्। तदेव च तृतीयार्थः"**[१] । एवं च कारकान्तरनिष्ठव्यापार-द्वाराक्रियाहेतुत्वाभावे सति क्रियाहेतुत्वसमनियतः कश्चन धर्म एव करणत्वमिति प्रतिफलतीति भावः। तस्य च करणत्वस्य स्वनिरूपकधात्वर्थानुकूल-त्वसम्बन्धेन भावनायामन्वयः। संख्याविशिष्टं लिङ्गविशिष्टं च कारकं भावनायामन्वेति इति तेषां सिद्धान्तस्य जागरूकत्वात्। कुठारेण छिनत्ति इति वाक्यात् कुठारनिष्ठकरणतानिरूपकछेदनानुकूला भावना इति बोधः। यतो हि- प्रकृते तृतीयार्थः एकत्वं करणत्वं च तत्र संख्या प्रकृत्यर्थे कुठारे अन्वेति कुठारश्च निष्ठत्वसम्बन्धेन करणत्वे अन्वेति, करणत्वं च स्वनिरूपकधात्वर्थानुकूलत्वसम्बन्धेन तिङर्थभावनायामन्वेति। छिदिधात्वर्थः द्वैधीभवनम्, तच्च तिङर्थभावनायामन्वेति। तथा चोक्तार्थो जायते।

**अत्र शाब्दबोधः, तृतीयार्थान्वयविचारश्च।**

चैत्रः कुठारेण छिनत्ति। इत्यत्र छिदिधातोः छेदनमर्थः। तिबर्थो भावना। कुठारपदोत्तरतृतीयार्थः करणत्वम्। कर्ता चाक्षेपलभ्यो वर्तते। एवं च चैत्रस्य आक्षेपलभ्ये कर्तृरि अभेदसम्बन्धेनान्वयः। कर्तुश्च स्वनिष्ठकर्तृत्वानिरूपकत्वसम्बन्धेन तिबर्थभावनायामन्वयः। कुठारस्य तृतीयार्थे करणत्वे निष्ठत्वसम्बन्धेनान्वयः। करणत्वस्य च भावनायां निरूपकत्वसम्बन्धेनान्वयः। धात्वर्थस्य छेदनस्यापि भावनायाम् अनुकूलत्वसम्बन्धेनान्वयः। ततश्चोक्तवाक्यात् चैत्राभिन्नकर्तृनिष्ठकर्तृतानिरूपिका कुठारनिष्ठकरणतानिरूपिका छेदनानुकूला भावनेति बोधो भवति । चैत्रत्वाच्छिन्नाभेदसंसर्गावच्छिन्न-प्रकारतानिरूपिताक्षेपलभ्यकर्तृनिष्ठविशेष्यतातत्समानाधिकरणकर्तृत्वावच्छिन्नस्वनिष्ठकर्तृता-निरूपकत्वं-सम्बन्धावच्छिन्नप्रकारतानिरूपिता या तिबर्थभावनानिष्ठाविशेष्यता अथ च कुण्ठारत्वा-वच्छिन्ननिष्ठसम्बन्धावच्छिन्निकुडारनिष्ठप्रकारतानिरूपिताकरणत्वनिष्ठविशेष्यतातादृश-विशेष्यतासमानाधिकरणकरणत्वाच्छिन्ननिरूपकत्वसंसर्गावच्छिन्नकरणत्वनिष्ठप्रकारतानिरूपिता तिबर्थभावनानिष्ठाविशेष्यता अथ च धात्वर्थफलत्वावच्छिन्नानुकूलत्वसम्बन्धावच्छिन्नप्रकारतानिरूपिता तिबर्थभावनानिष्ठाविशेष्यता तादृशविशेष्यताशालिशाब्दबोधो जायते चैत्रः कुठारेण छिनत्ति।

सन्दर्भाः-

1. संस्कृतटीकाशब्दशक्तिप्रकाशिकापत्रसंख्या ३११/ प्रकाशनम्-२००७/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
2. संस्कृतटीकाशब्दशक्तिप्रकाशिकापत्रसंख्या ३११/ प्रकाशनम्-२००७/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।

3. संस्कृतटीकाशब्दशक्तिप्रकाशिकापत्रसंख्या ३११/ प्रकाशनम्-२००७/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
4. संस्कृतटीकाशब्दशक्तिप्रकाशिकापत्रसंख्या ३१२/ प्रकाशनम्-२००७/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
5. स्कृतटीकाशब्दशक्तिप्रकाशिकापत्रसंख्या ३१२/ प्रकाशनम्-२००७/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
6. संस्कृतटीकाशब्दशक्तिप्रकाशिकापत्रसंख्या ३१२/ प्रकाशनम्-२००७/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
7. संस्कृतटीकाशब्दशक्तिप्रकाशिकापत्रसंख्या ३१३/ प्रकाशनम्-२००७/ प्रकाशक: चौखम्बाप्रकाशनम्, वाराणसी।
8. व्युत्पत्तिवादे
9. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्या ३९/ प्रकाशनवर्षम्-२०१२/ प्रकाशक: राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपति:।
10. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्या ३९/ प्रकाशनवर्षम्-२०१२/ प्रकाशक: राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपति:।
11. व्याख्याचतुष्टयोपेततर्कसंग्रहपत्रसङ्ख्या ६९/ प्रकाशनवर्षम्-२०१२/ प्रकाशक: चौखम्बाविद्याभवनम्, वाराणसी।
12. न्यायकोशपत्रसङ्ख्य ८३०/ प्रकाशनम्-१९९६/ प्रकाशक: भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्, पुण्यपत्तनम्।
13. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभागपत्रसङ्ख्या ३९/ प्रकाशनवर्षम्-२०१२/ प्रकाशक: राष्ट्रियसंस्कृतविद्यापीठम्, ति रूपति:।
14. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभा०पत्रसङ्ख्या ४०/ प्रकाशनवर्षम्-२०१२/ प्रकाशक: राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपति:।
15. विद्वन्मनोरमायुतव्युत्पत्तिवादद्वितीयभा०पत्रसङ्ख्या ४३/ प्रकाशनवर्षम्-२०१२/ प्रकाशक: राष्ट्रियसंस्कृतविद्यापीठम्, तिरूपति:।
16. समयूखभाट्टचिन्तामणिपत्रसंख्या ९८/ प्रकाशनवर्षम्-१९३३/ प्रकाशक: चौखम्बासंस्कृतसीरिज:, वाराणसी।
17. समयूखभाट्टचिन्तामणिपत्रसंख्या ९८/ प्रकाशनवर्षम्-१९३३/ प्रकाशक: चौखम्बासंस्कृतसीरिज:, वाराणसी।
18. समयूखभाट्टचिन्तामणिपत्रसंख्या ९८/ प्रकाशनवर्षम्-१९३३/ प्रकाशक: चौखम्बासंस्कृतसीरिज:, वाराणसी।
19. भाट्टतन्त्ररहस्यपत्रसंख्या १११/ प्रकाशनवर्षम्-१९७०/ प्रकाशक: संस्कृतविद्याधर्मविज्ञानसंकाय:, वाराणसी।

**– सहायकाचार्य: व्याकरणविभाग:, सं०सं०वि०वि०वाराणसी**

पञ्चचत्वारिंशम्

ISSN 2231-6221

# परिशीलनम्

उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिकी शोधपत्रिका

सामान्य-अङ्कः



उत्तरप्रदेश-संस्कृत-संस्थानम्

(उत्तरप्रदेश-शासनाधीनम्)

520, इन्दिराभवनम्, लखनऊ

पञ्चचत्वारिंशम्

ISSN 2231-6221

# परिशीलनम्

## उत्तरप्रदेशसंस्कृतसंस्थानस्य षाण्मासिकी शोधपत्रिका

संवत् 2078 दिसम्बर 2021

**( सामान्य-अङ्कः )**

सम्पादकः

**प्रो. भारतभूषणत्रिपाठी**

आचार्यः व्याकरणविभागस्य

केन्द्रीयसंस्कृतविश्वविद्यालयस्य, लखनऊ-परिसरस्य

विशालखण्डः-4, गोमतीनगरम्

लखनऊ-226010

**उत्तरप्रदेश-संस्कृत-संस्थानम्**

520, इन्दिराभवनम्, लखनऊ-226001

(उत्तरप्रदेश-शासनाधीनम्)

प्रकाशकः
**श्रीपवनकुमारः**
निदेशकः
उत्तरप्रदेश संस्कृत-संस्थानम्

प्रथमं संस्करणम् - दिसम्बर 2021

**ISSN 2231-6221**

एका प्रतिः : 50 रूप्यकाणि
वार्षिकमूल्यम् : 100 रूप्यकाणि

प्राप्तिस्थानम्
**विक्रय-विभागः**
उत्तरप्रदेश-संस्कृत-संस्थानम्
520, इन्दिराभवनम्, अशोकमार्गः, लखनऊ-226001
फोन- 0522-2780251
Email- upsanskritsansthanam@yahoo.com
वेवसाइट-www.upsanskritsansthanam.org

मुद्रकः
**शिवम् आर्ट्स प्रेस,**
512/570, दूसरी गली, निशातगंज, लखनऊ
फोन : 0522-4104922 मो. : 9415061690

# विषयानुक्रमणिका


| | | |
|---|---|---|
| अध्यक्षीयम् | | |
| निदेशकीयम् | | |
| सम्पादकीयम् | | |
| 1. अर्थान्वाख्यानप्रधानं निरुक्तम् | प्रो. मुदिवेडु चन्द्रशेखर: | 1 |
| 2. वैदिकवाङ्मये देवानां स्वरूपम् | प्रो. अशोकचन्द्रगौड़शास्त्री | 7 |
| 3. मूल्य-शिक्षा | प्रो. देवीप्रसादद्विवेदी | 17 |
| 4. शाब्दिकदृष्ट्या शक्तिनिरूपणम् | प्रो. भारतभूषणत्रिपाठी | 26 |
| 5. आचार्यनागेशाभिमतकर्मद्वितीयार्थविमर्श: | डॉ. दिव्यचेतनब्रह्मचारी | 31 |
| 6. आधुनिकसंस्कृतवाङ्मये बुद्धविजयकाव्यस्य स्थानं प्रासङ्गिकता च | डॉ. प्रफुल्लगडपाल: | 45 |
| 7. 'कोरोना'-रोगस्य निवारणम् | डॉ. रामेश्वरप्रसादगुप्त: | 53 |
| 8. श्रीमद्भागवतमहापुराणे सात्त्विक-शृंगारचिन्तनम् | डॉ. अरविन्दकुमारतिवारी | 57 |
| 9. तात्पर्यार्थविमर्श: | डॉ. मनमोहनतिवारी | 69 |
| 10. लिङ्गस्वरूपविमर्श: | डॉ. नीरजकुमारभार्गव: | 74 |
| 11. व्याकरणशास्त्रे वृत्तिविचार: | डॉ. प्रमोदकुमारशुक्ल: | 82 |
| 12. विनामविधि(णत्व)विमर्श: | डॉ. सुधाकरमिश्र: | 90 |
| 13. श्रीगोविन्दकृतरत्नावली'द्युति' टीकाया: प्रथमाङ्कस्य पाठसम्पादनम् | डॉ. सुमनचन्द्रपन्त 'सुमन्त' | 94 |
| 14. वैदिकदृष्ट्या संस्कृत-जैन आदिपुराणस्य संस्काराणां समीक्षा | डॉ. मनोरमा जैन | 110 |
| 15. महाकविकालिदासवाङ्मये राजनैतिकतत्त्वानां विवेचनम् | डॉ. सुमेरीलाल: | 123 |
| 16. महाकविभवभूते: करुणरसस्य मनोवैज्ञानिकविश्लेषणम् (जेम्सलांजेकेननबर्डयो: संवेगसिद्धान्तमधिकृत्य) | श्रीपवनचन्द्र: | 129 |


*****

# आचार्यनागेशाभिमतकर्मद्वितीयार्थविमर्शः

- वाचस्पतिः डा. दिव्यचेतनब्रह्मचारी

व्याकरणदर्शन में कारक प्रकरण का अतीव गम्भीर विवेचन है। सात विभक्तियों कर्तादि अर्थ में होती है, उसी क्रम में द्वितीया विभक्ति कर्म अर्थ में होती है। अत एव कारक एवं कर्म द्वितीयार्थ का विवेचन प्रस्तुत निबन्ध में किया गया है।

*

वैयाकरणनिकाये सन्ति प्रसिद्धा अनेके आचार्याः, तेष्वन्यतमः श्रीमान् नागोजीभट्टः तं को न जानाति विश्वस्मिन्। तत्र कर्मत्वव्यापकं कारकत्वम् व्याप्यधर्माच्छिन्ने कार्ये जननीये व्यापकधर्मावच्छिन्नकार्यसामग्र्यपेक्षा भवतीति सिद्धान्तात्तत्रादौ कारकपदार्थः प्रस्तूयते आचार्य-नागेशमतानुसारेण-

आचार्याः नागेशाः करोति क्रियां निर्वर्त्तयति, इति व्युत्पत्त्यनुरोधेन क्रियाजनकत्वं कारकत्वम्, इति कारकलक्षणं स्वीकुर्वन्ति। जनकत्वं चात्र कारणत्वरूपं विवक्षितम्। कारणत्वं च अन्यथासिद्धिशून्यत्वे सति कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणात्यन्ताभाव-प्रतियोगितानवच्छेदकधर्मवत्त्वम्। एवञ्च मैत्रस्य तण्डुलं पचतीत्यादौ मैत्रस्यान्यथासिद्धत्वेन क्रियाजनकत्वाभावान्न कारकत्वम्। सम्प्रदानस्य तु अनुमतिप्रकाशनद्वारा क्रियाजनकत्वम्। अनुमतिसत्त्वे दानस्य प्रवृत्तिः, तदभावे तदभावः, इत्यन्वयव्यतिरेकाभ्याम्। एवं कटे आस्ते इत्यादौ अधिकरणकार-कस्यापि स्थितिं प्रति कारणत्वात् क्रियाजनकत्वमक्षुण्णमेव। न च घटं करोतीत्यादौ घटस्यानुत्पन्नत्वेन क्रियाजनकत्वाभावात् कारकत्वानापत्तिरिति वाच्यम्। कपालनिष्ठजनकत्वस्य घटे आरोपेणादोषात्। सत्कार्याभिगमाद् बौद्धार्थकर्मत्वाद्वा। एवमपादानस्यापि क्रियाजनकत्वम्, वृक्षाभावे पर्णविभागस्यैवा-सम्भवात्।

तत्र कारकविषये मतद्वयं समुपलभ्यते शक्तिकारकं शक्तिमत्कारकमिति। उभावपि पक्षौ सूत्रकारादिसम्मतौ। तथाच सूत्रम्-सप्तमीपञ्चम्यौ कारकमध्ये सूत्रमेव मानं शक्तिः कारकम् शक्तिमत् कारकमत्र मानं तु कर्मणि द्वितीया इत्यादिशास्त्रम्। तथाहि - चाह कारकलक्षणं भर्तृहरिः-

**स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।**
**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः[1]।।**

**अयमर्थः**- स्वाश्रये साधनाश्रये, समवेतानां क्रियाणाम्, तद्वदेवाश्रयान्तरे समवेतानां क्रियाणामभिनिष्पत्तौ सिद्धौ यत्सामर्थ्यं तद् भाष्यकारप्रभृतयः साधनं विदुरिति पदयोजना। तत्र कर्तृत्वशक्तिरूपं सामर्थ्यं स्वाश्रये समवेतानां व्यापाररूपाणां क्रियाणां सिद्धौ साधनम्। कर्मत्वशक्तिरूपं सामर्थ्यं तु स्वाश्रये समवेतानां क्रियते इति व्युत्पत्या फलरूपाणां क्रियाणां सिद्धौ साधनम्। करणत्वादिशक्तिरूपं तु सामर्थ्यमाश्रयान्तरे स्वाश्रयातिरिक्ते आश्रये समवेतानां क्रियाणां फलरूपाणां व्यापाररूपाणां वा सिद्धौ साधनमिति विवेकः। तत्रापि करणत्वम् फलरूपाणां क्रियाणां साधनम्। सम्प्रदानत्वं तु दातृगतानां व्यापाररूपाणां क्रियाणां साधनम्। अश्वात् पतति, इत्यादावपादानत्वमपि परसमवेतानां व्यापाररूपाणामेव क्रियाणां साधनम्। अधिकरणत्वं तु फलरूपाणां क्रियाणां साधनम्। अत्र च पक्षे सप्तमीपञ्चम्यौ कारकमध्ये इति सूत्रं तद्भाष्यं च प्रमाणम्, तथाहि- तत्र हि क्रियामध्ये इति वक्तव्यम् इहापि यथा स्यात्। अद्य देवदत्तो भुक्त्वा द्व्यहाद् भोक्ता द्व्यहे भोक्ता। अयम्भावः द्रव्यं कारकम्। तच्च देवदत्तरूपम्, अद्य द्व्यहानन्तरञ्चैकमेव। भेदनिबन्धनो हि मध्यव्यवहारः इति द्व्यहस्य द्वयोः कारकयोर्मध्यवाचकत्वाभावात् सप्तमीपञ्चम्यौ न प्राप्नुतः। क्रियामध्ये इति कथने तु भुजिक्रियायाः कालभेदेन भेदात् भुजिक्रिययोर्मध्ये द्व्यहरूपो कालो भवतीति न दोषः। कारकमध्ये इतीयत्युच्यमाने इहैव स्यात् इहस्थोऽयमिस्वासः क्रोशाल्लक्ष्यं विध्यति क्रोशे लक्ष्यं विध्यति। यं च विध्यति यतश्च विध्यति तयोः तन्मध्यं भवति। अत्र भाष्ये इत्युक्त्या कर्मापादानयोर्मध्यत्वं भाष्यकृदभिप्रेतं प्रतीयते। तदुक्तं कैयटेनापि लक्ष्यप्रदेशयोः कर्मापादनयोर्भेदान्मध्यव्यपदेशसद्भावः, इति कौमुद्यान्तु कर्तृकर्मशक्त्योर्मध्येऽयं देशः इत्युक्तम्।

ततः क्रियामध्य इति वक्तव्यम् इति वार्तिकप्रत्याख्यानाय तत्तर्हि वक्तव्यम्। न वक्तव्यम्। नान्तरेण साधनं क्रियायाः प्रवृत्तिर्भवति। क्रियामध्यं चेत्कारकमध्यमपि भवति इत्युक्तम्भाष्ये। तस्यायमाशयः नान्तरेण साधनम् इत्यत्र साधनपदं शक्तिपरम्। तथा च कालभेदभिन्नभुजिक्रियानुमितयोः द्वयोः कर्तृत्वशक्त्योर्मध्यव्यपदेशोऽस्त्येवेति। शक्तिमतः एव कारकत्वे कर्तृत्वशक्तिमतो देवदत्तस्यैक्यात् पदार्थद्वयनिरूपितं मध्यत्वं न स्यादिति वार्तिकप्रत्याख्यानं विरुद्ध्येत। शक्तेः कारकत्वे तु कर्तृत्वशक्तिनिरूपकभुजिक्रियाया भेदात् कर्तृत्वशक्तेरपि भेदेन अद्यतनभुजिनिरूपितकर्तृत्वशक्तेः द्व्यहोत्तरभुजिनिरूपित-कर्तृत्वशक्तेर्भेदात् तयोः शक्त्योर्मध्ये द्व्यरूपः कालो मध्यः सम्पद्यते इति सूत्रेणैव कारकमध्यत्वमादायैव लक्ष्यं सिध्यतीति क्रियामध्ये इति वक्तव्यम् इति वार्तिकप्रत्याख्यानं

सङ्गच्छते।

अनभिहिते इति सूत्रभाष्यादपि शक्तिः कारकम् इति पक्षः प्रतीयते। तथाहि- द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभक्त्यभावप्रसङ्गः। द्वयोः क्रिययोः कारकेऽन्यतरेणाभिहिते विभक्तिर्न प्राप्नोति। क्व? प्रासादे आस्ते शयने आस्ते इति। किं कारणम्? सदिप्रत्ययेनाभिहितमधिकरणमिति कृत्वा सप्तमी प्राप्नोति, न वाऽन्यतरेणानभिधानात्। न वा एष दोषः। किं कारणम् अन्यतरेणानभिधानात्। अन्यतरेणात्रानभिधानम्। सदिप्रत्ययेन अभिधानम्। आसिप्रत्ययेनानभिधानम्। यतोऽनभिधानं तदाश्रया सप्तमी भविष्यति। कुतो नु खल्वेतत् सत्यभिधाने चानभिधाने चानभिहिताश्रया सप्तमी भविष्यति, न पुनरभिहिताश्रयः प्रतिषेधः इति अनभिहिते हि विधानम्। अनभिहिते सप्तमी विधीयते। नाभिहिते प्रतिषेधः इति। पर्युदासनञ् शक्तिः कारकम् इति पक्षञ्चाश्रित्य समाधत्ते भाष्यकारः- अत्राधिकरणत्वशक्तिद्वयम् सदिनिरूपितम्, आसिनिरूपितञ्च। तत्राभिहितं यत् सदिनिरूपितमधिकरणत्वं तद्भिन्नं यदासिनिरूपितमधिकरणत्वं तदाश्रया सप्तमी निर्बाधा। शक्तिमतोऽधिकरणत्वे पर्युदासे प्रसज्ये च दोष इति उक्तपरिहारो न सम्भवेदित्यभिप्रायेणाह भगवान् किं पुनर्द्रव्यं साधनम् कारकम्, आहोस्विद् गुणः शक्तिः कारकम्, किञ्चातः। यदि द्रव्यं साधनं नैतदन्यद् भवत्यभिहितात् इति पर्युदासपक्षेऽपि दोष एव। अथ किं गुणः साधनम्, भवेत्येतदन्यदभिहितात्। अन्यो हि सदिगुणः शक्तिः, अन्यश्चासिगुणः शक्तिः। किं पुनः साधनं न्याय्यम्। गुणः इत्याह कथं ज्ञायते। एवं हि कश्चित् कञ्चित् पृच्छति- क्व देवदत्त इति। स तस्मा आचष्टेऽसौ वृक्षे इति। कतरस्मिन् यस्तिष्ठति इति। स वृक्षोऽधिकरणं भूत्वाऽन्येन शब्देनाभिसम्बध्यमानः कर्ता सम्पद्यते। वृक्षे आस्ते इत्यत्राधिकरणम्। यः वृक्षः तिष्ठति इत्यत्र कर्ता इति भावः। द्रव्ये पुनः साधने सति यत्कर्म तत्कर्मैव स्यात्, यत्कारणं तत्कारणमेव यदधिकरणमधिकरणमेव इति भाष्येण कण्ठत एव शक्तिः कारकम् इति पक्षस्य न्याय्यत्वं समर्थितं भवति।

**सरलतयेत्थमत्र फलितम्- शक्तिः कारकम्-**

तथाहि - तत्र तावत्षट् कारकशक्तयः सन्ति। कर्तृत्वम्, कर्मत्वम्, करणत्वम्, सम्प्रदानत्वम्, अपादानत्वम्, अधिकरणत्वञ्चेति। अत एव प्रोक्तमपि भर्तृहरिणा-

**नित्याः षट् शक्तयोऽन्येषां भेदाभेदसमन्विताः।**
**क्रियासंसिद्धयेऽर्थेषु जातिवत् समवस्थिताः**[2] ।।

एवं च शक्तिकारकमिति पक्षे तत्तद्विभक्तीनां तत्तद्धर्मवाचकत्वं स्वीकर्तव्यम्। कर्मद्वितीयायाः

कर्मत्वशक्तिरर्थः, आश्रयत्वं वा। कर्तृतृतीयायाः कर्तृत्वशक्तिरर्थः। करणतृतीयायाः करणत्वशक्तिरर्थः। सम्प्रदानचतुर्थीविभक्तेरर्थः सम्प्रदानत्वम्। अपादानपञ्चमीविभक्तेः अपादानत्वमर्थः। अधिकरण-सप्तमीविभक्तेः अधिकरणत्वमर्थः। शेषषष्ठीविभक्तेरर्थः सम्बन्ध इति। अस्मिन् च पक्षे कर्मणि द्वितीया इति तत्तद्विभक्तिविधायकसूत्रेषु भावप्रधाननिर्देशं स्वीकृत्य कर्मत्वे द्वितीया विभक्तिः भवतीत्यर्थ सम्पाद्य तत्तत्सूत्रविरोधः परिहरणीयः। तत्रायं पक्षः नैयायिकैः मीमांसकैः वैयाकरणैश्च सर्वैरेव स्वीकृतमिति अयमपि पक्षः सर्वसिद्धः।

**अत्र शक्तिमद् कारकम्**

अत्र शक्तिमत्कारकमिति पक्षानुसारं तत्तत्कारकविभक्तीनामर्थः प्रतिपाद्यते। तथाहि षट् शक्तिमन्तः सन्ति। कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणञ्चेति। तत्र कर्मणि द्वितीया [पा0सू0 2-3-2] इति सूत्रेण कर्मणि विहितायाः द्वितायायाः विभक्तेः कः शक्य इति प्रतिपाद्यते। तथाहि-

श्रीमान् नागेशो वैयाकरणसिद्धान्तलघुमञ्जूषायां एकत्र स्थले गदति- **''कर्मणि विहितद्वितीयायाः कर्मत्वशक्तिमानर्थः। कर्मणीति सूत्रस्वरसात्''**[3] । पुनः द्वितीयस्थले वदति- **''परे तु कर्मत्वादिशक्तिमान् तद्गतं विशेषणत्वं क्रियाकारकभावः सम्बन्धश्च द्वितीयार्थः''**[4]। वैयाकरणसिद्धान्तमञ्जूषायां वदति- **''तत्र द्वितीयायाः कर्मणि शक्तिग्राहकं सूत्रम् कर्मणि द्वितीया इति। अत्र कर्मपदेनैतच्छास्त्रविहितकर्मसंज्ञकमात्रं गृह्यते अविशेषात्। अत्र कर्तुरीप्सिततमं कर्म इति सूत्रबोधितकर्मविहितद्वितीयाया आश्रयोऽर्थः, फलस्य धातुनैव लाभात्''**[5]। लघुशब्देन्दुशेखरे वदति- **''सर्वकर्मविहितद्वितीयादीनां कर्मत्वशक्तिमानर्थः क्रियाकारकभावः सम्बन्धश्च तदर्थः''**[6]। बृहच्छब्देन्दुशेखरे वदति- **''तत्र कर्त्तुरीप्सिततममिति सूत्रबोधितकर्मविहितद्वितीयाया आश्रयोऽर्थः। फलस्य धातुनैव लाभात्''**[7] । एवं च अत्रेदं वक्तुं शक्यते यन्नागेशभट्टमते कर्मद्वितीयायाः कर्मत्वशक्तिमान् क्रियाकर्मभावः सम्बन्धश्चार्थः। कर्मत्वशक्तिमान् एव कर्म भवति। तच्च किमिति चेदुच्यते, नागेशभट्टेन परमलघुमञ्जूषा वैयाकरणसिद्धान्तलघुमञ्जूषा वैयाकरणसिद्धान्तमञ्जूषा लघुशब्देन्दुशेखरः बृहच्छब्देन्दुशेखरः, इत्येतेषु ग्रन्थेषु तत्स्वरूपं वर्णितम्, अतस्तत्तद्ग्रन्थानुसारं कर्मस्वरूपं प्रतिपाद्यते। तथाहि-

**कर्मस्वरूपविचारः-**

अत्र परमलघुमञ्जूषा- लघुशब्देन्दुशेखरः- बृहच्छब्देन्दुशेखरश्च।

तत्र तावत् त्रिषु ग्रन्थेषु समानमेव लक्षणं कर्मणो लभ्यते तस्माद्युगपदेव सर्वं प्रस्तूयते। तत्र

परमलघुमञ्जूषायां निरूपयति नागेशभट्टः- **''कर्मत्वं च प्रकृतधात्वर्थप्रधानीभूतव्यापार-प्रयोज्यप्रकृत-धात्वर्थफलाश्रयत्वेनोद्देश्यत्वम्''**[8] इति कर्मणो लक्षणम्। लघुशब्देन्दुशेखरेऽपि कर्तुरीप्सिततमं कर्म इति सूत्रव्याख्यानप्रसङ्गे एवम्भूतमेव कर्मलक्षणं भवति। तत्र हि ईप्सिततमस्य कर्मसंज्ञा कर्तुरीप्सिततममिति सूत्रेण क्रियते, तस्मात्कर्म नाम ईप्सिततमम्, तच्च किमिति प्रश्ने वदति **''ईप्सिततमत्वञ्च प्रकृतधात्वर्थप्रधानीभूत-व्यापारप्रयोज्यप्रकृतधात्वर्थ-फलाश्रयत्वेनोद्देश्यत्वम्''**[9]। तस्मादुभयोर्ग्रन्थियोः समानमेव लक्षणं वर्तते। अत्र लक्षणसमन्वयः तत् परिष्कारश्च प्रस्तूयते। तथाहि यथा यज्ञदत्तः तण्डुलं पचति, इत्यत्र प्रकृतधातुः पच्धातुः तदर्थप्रधानीभूतव्यापारः, विक्लित्त्यनुकूलव्यापारः, तत्प्रयोज्यं प्रकृतधात्वर्थफलं विक्लित्तिः, तदाश्रयत्वेनोद्देश्यः तण्डुलः, अतस्तस्य कर्मत्वमिति भावः। फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वं बोध्यम्। तेन स्तोकं पचति, शोभनं पचतीत्यादौ तत्समानाधिकरणे द्वितीया सिध्यति। अत एवावोचत् लघुशब्देन्दुशेखरे **''फलस्यापि व्यपदेशिवद्भावेन फलसम्बन्धि-त्वात्कर्मत्वम्''**[10] । तत्समानाधिकरणे स्तोकं पचति इत्यादौ कर्मत्वसिद्धिः। बृहच्छब्देन्दुशेखरेऽपि वदति **''फलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वात्कर्मत्वं बोध्यम्। तथा चोक्तम् - तत्समानाधिकरणे शोभनं पचतीत्यादौ कर्मत्वसिद्धिः''**[11] ।

अत्र प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वं कर्मत्वम् इत्युक्तौ गोपालः गां पयः दोग्धि, इत्यत्र पयसः कर्मत्वं न स्यात्। यतोहि-दुह्धात्वर्थप्रधानीभूतो यो हि गोपालनिष्ठः विभागानुकूलव्यापारानुकूलव्यापारः, तज्जन्यं प्रकृतधात्वर्थफलम्, विभागानुकूलव्यापाररूपं न तु विभागरूपम्, तस्मात् गोरेव कर्मत्वं स्यान्न तु विभागाश्रयस्य पयसः, अतस्तस्य कर्मत्वसिद्ध्यर्थं लक्षणे प्रयोज्यत्वनिवेशः। प्रयोज्यत्वस्य निवेशे च सति विभागाश्रयस्य पयसोऽपि कर्मत्वं सिद्ध्यति विभागरूपफलस्यापि तादृशव्यापारप्रयोज्यत्वात्। यतोह प्रयोज्यत्वन्नाम जन्यजन्यत्वम्। अत एवोक्तं नागेशेन **''गां पयो दोग्धि, इत्यादौ पयोवृत्तिर्यो विभागस्तदनुकूलो व्यापारो गोवृत्तिः तदनुकूलश्च गोपवृत्तिः। अत्र पयसः कर्मत्वसिद्धये प्रयोज्यत्वनिवेशः। जन्यत्वनिवेशे तन्न स्यात्''**[12]। लघुशब्देन्दुशेखरेऽपि वदति **''गां पयो दोग्धि, इत्यादौ विभागानुकूलव्यापारानुकूल-व्यापारार्थकदुहियोगे पयसः कर्मत्वसिद्धिरिति स्पष्टं भाष्ये''**[13] ।

अत्र प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वं कर्मत्वम् इत्यक्तौ यज्ञदत्तः प्रयागात् वाराणसीं गच्छति, इत्यत्र प्रकृतगम्धात्वर्थप्रधानीभूतोत्तर-देशसंयोगानुकूल-व्यापारप्रयोज्यस्य संयोगरूपफलस्याश्रयस्य वाराणस्या यथा कर्मत्वं तथैव तादृशव्यापारप्रयोज्य-

विभागरूपफलस्याश्रयस्य प्रयागस्यापि कर्मत्वं स्यादतस्तत्र दोषवारणाय फले प्रकृतधात्वर्थः इति विशेषणम्। तद्दाने च न तत्र दोषो विभागस्य प्रकृतधात्वर्थत्वाभावात्। उक्तं च नागेशेन **"प्रयागात्काशीं गच्छति इत्यत्र प्रयागस्य कर्मत्ववारणाय प्रकृतधात्वर्थफलेति। न हि विभागः प्रकृतधात्वर्थः किन्तु नान्तरीयकतया गमने उत्पद्यते, प्रयागस्य फलाश्रयत्वेनानुद्देश्यत्वाच्च"**[14] ।

अत्र प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वं कर्मत्वम्, इत्येवोक्तौ काशीं गच्छन् पथि मृतः, इत्यत्र काश्याः कर्मसंज्ञा न स्यात् फलाश्रयत्वाभावात्। अतोऽत्र कर्मत्वसिद्ध्यर्थं लक्षणे उद्देश्यत्वस्य निवेशः। एवं च तन्निवेशे न दोषः। यतोहि काश्याः फलाश्रयत्वाभावेऽपि काशी संयोगाश्रया भवतु, इत्याकारककर्तृवर्त्तीच्छायाः उद्देश्यत्वस्य तत्रापि सत्त्वेन तस्याः अपि कर्मत्वसिद्धिरिति भावः। निरूपितं च नागेशेन **"ननु प्रकृतधात्वर्थग्रहणेनैवात्र वारणादुद्देश्यत्वनिवेशः किमर्थ इति चेत् न, तस्यासाधारणं प्रयोजनं काशीं गच्छन् पथि मृतः, इति काश्याः फलाश्रयत्वाभावेऽपि फलाश्रयत्वेनोद्देश्यत्वसत्त्वात्कर्मत्वम्"**[15] ।

अथ एवमपि चैत्रः काशीं गच्छति न प्रयागम् इत्यादिवाक्ये प्रयागस्य कर्मसंज्ञा न स्यात्, तस्य फलाश्रयत्वेनोद्देश्यत्त्वाभावात्, इति चेत्सत्यम्। अतोऽत्र दोषवारणाय लक्षणं परिष्क्रियते। तथाहि- कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्त्वप्रकारकेच्छोद्देश्यत्वयोग्यता-विशेषशालित्वं कर्मत्वमिति। एवं च चैत्रः काशीं गच्छति न प्रयागम् इत्यत्र इच्छीयोद्देश्यत्वाभावेऽपि योग्यताविशेषशालित्वस्य तत्र सत्त्वेन तस्य कर्मत्वं सुलभम्। भणितं च नागेशेन **"ननु काशीं गच्छति चेत्रे चैत्रः काशीं गच्छति न प्रयागमिति प्रयोगानुपपत्तिः, प्रयागस्य फलाश्रयत्त्वेनोद्देश्यत्वाभावादिति चेदुच्यते। कर्मलक्षणे ईप्सिततमपदस्य स्वार्थविशिष्टयोग्यताविशेषे लक्षणा"**[16]। अथवा काशीं गच्छति न प्रयागम् इत्यादौ तादृगिच्छाविषयत्वं प्रयागादावारोप्यैव कर्मत्वं बोध्यम्। अत एव रथो ग्रामं गच्छति इत्यादौ ग्रामस्य कर्मत्वं रथनिरूपितोद्देश्यत्वमारोप्यैव कर्मत्वमुक्तम्।

**अथ फलतावच्छेदकसम्बन्धविचारः**

अथ कर्तृवृत्तिव्यापारप्रयोज्यफलाश्रयत्त्वप्रकारकेच्छोद्देश्यत्वयोग्यताविशेषशालित्वं कर्मत्वम् इत्यत्र कर्मलक्षणे फलाश्रयता केन सम्बन्धेन विवक्षिता इति चेत्, अत्र फलाश्रयता न येन केनापि सम्बन्धेन ग्रहीतव्या तथा स्वीकारे कालिकसम्बन्धेन फलाश्रयः पाषाणं भवतु इतीच्छोद्देश्यत्वे पाषाणं पचति, इत्यापत्तेः। नापि कालिकातिरिक्तसम्बन्धेन जनकत्वसम्बन्धेन। तथा सति जनकत्वसम्बन्धेन फलाश्रयो व्यापारोऽस्तु इतीच्छायां व्यापारं पचति इत्यापत्तेः। एवं च सति केन सम्बन्धेन फलाश्रयता विवक्षिता इति चेदत्रोच्यते, फलतावच्छेदकसम्बन्धेनैवात्र फलाश्रयता विवक्षिता।

फलतावच्छेदकसम्बन्धश्च फलनिष्ठाधेयतावच्छेदकत्वे सति धातुजन्योपस्थितीय-विषयताश्रयः। सर्वेषां धातूनां फलविशिष्टव्यापारे शक्तिः, वैशिष्ट्यञ्च स्वानुकूलत्वम् स्वाधि-करणवृत्तित्वम् इत्युभयसम्बन्धेन। यथा चैत्रः तण्डुलं पचति इत्यत्र पच्धातोः विक्लित्ति-विशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वानुकूलत्वम्, स्वनिष्ठसमवायसम्बन्धावच्छिन्ना-धेयतानिरूपिताधि-करणतावद्वृत्तित्वम् इत्युभयसम्बन्धेन। एवं चात्र समवायसम्बन्धः फलतावच्छेदकसम्बन्धः। यतो हि व्यापारो विक्लित्तिजनको वर्तते, अतः व्यापारे स्वानुकूलत्वसम्बन्धेन पच्धातुवाच्यविक्लित्तिवैशिष्ट्यं वर्तते। फलं च तण्डुले वर्तते समवायसम्बन्धेन व्यापारोऽपि कालिकसम्बन्धेन तण्डुले वर्तते। एवं फलम् आधेयः, अतस्तन्निष्ठा आधेयता, तण्डुलश्च आधिकरणम्, अतस्तन्निष्ठा अधिकरणता, किञ्च फलं समवायेन तण्डुले वर्तते इति कृत्वा आधेयतावच्छेदकसम्बन्धः समवायः, अतः आधेयता समवायसम्बन्धावच्छिन्ना। एवं च द्वितीयसम्बन्धस्य समन्वयो भवति, स्वं फलम्, तन्निष्ठा समवायसम्बन्धावच्छिन्ना या आधेयता तन्निरूपिता तण्डुलनिष्ठा अधिकरणता, तद्वान् तण्डुलः, तद्वृत्तित्वमपि व्यापारे वर्तते, कालिकसम्बन्धेन तण्डुले व्यापारस्य विद्यमानत्वात्। एवं च प्रकृते समवायसम्बन्धः फलतावच्छेदकसम्बन्धः, तस्य विक्लित्तिरूपफलनिष्ठाधेयतावच्छेदकत्वे सति पच्धातुजन्योपस्थितीयविषयताश्रयत्वात्। एवं च चैत्रः तण्डुलं पचतीत्यादौ समवायरूप-फलतावच्छेदकसम्बन्धेन विक्लित्तिरूपफलस्याश्रयो भवति तण्डुल एव न तु पाषाणः, अतस्तण्डुलस्यैव कर्मसंज्ञा न तु पाषाणस्य तेन चैत्रः तण्डुलं पचतीति प्रयोगो भवति। चात्रः पाषाणं पचतीति प्रयोगस्तु नैव भवति।

एवं घटो नश्यति, इत्यादिषु स्थलेषु नश्यतेः नाशविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वानुकूलत्वम्, स्वनिष्ठप्रतियोगित्वसम्बन्धावच्छिन्नाधेयतानिरूपिताधित-करणतावद्वृत्तित्वम् इति उभयसम्बन्धेन।

एवं घटं जानाति इत्यादिषु स्थलेषु जानातेः ज्ञानविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वानुकूलत्वम्, स्वनिष्ठविषयतासम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वम् इति उभयसम्बन्धेन।

एवं घटम् इच्छति इत्यादिषु स्थलेषु इच्छतेः इच्छाविशिष्टव्यापारोऽर्थः। वैशिष्ट्यञ्च स्वानुकूलत्वम्, स्वनिष्ठविषयतासम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावद्वृत्तित्वम् इति उभय-सम्बन्धेन। एवमेवेतरत्रापि बोध्यम्।

**वैयाकरणसिद्धान्तलघुमञ्जूषा-**

तत्र वैयाकरणसिद्धान्तलघुमञ्जूषायामपि वदति नागेशः **''तत्र कर्मणि द्वितीयेति सूत्रम्। तत्र कर्मत्वं व्याकरणशास्त्रे बोधितकर्मसंज्ञकत्वम्। तत्र कर्तुरीप्सिततमं कर्मेति सूत्रबोधितं कर्मत्वं कर्तृगतप्रकृतधात्वर्थव्यापारप्रयोज्य-व्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वम्। तण्डुलं पचति इत्यादौ विक्लित्त्याश्रयत्वात्कर्मत्वम्। विक्लित्तिरूपफलस्यापि व्यपदेशिवद्भावेन फलाश्रयत्वम्। अत एव तत्समानाधिकरणे स्तोकं पचति इत्यादौ कर्मत्वम्''**[17]। एवं वैयाकरणसिद्धान्तलघुमञ्जूषानुसारमपि कर्तृवृत्तिप्रकृतधात्वर्थव्यापार-प्रयोज्यव्यापार-व्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वं कर्मत्वमिति लक्षणं प्रतिफलति। यथा मैत्रः तण्डुलं पचतीत्यादौ मैत्ररूपकर्तृवृत्तिप्रकृतपचिधात्वर्थाधिश्रयणादिव्यापारप्रयोज्यव्यापारव्यधिकरण-विक्लित्तिरूपफलाश्रयत्वेन कर्तुः मैत्रस्योद्देश्यः तण्डुलः, ततश्च तस्य कर्मत्वमिति भावः। एवं विक्लित्यादिफलमपि व्यपदेशिवद्भावेन फलाश्रयो भवतीति कृत्वा तस्यापि कर्मसंज्ञा भवति, तत्राभेदेन विशेषणीभूते स्तोकादौ च द्वितीया भवति। तेन स्तोकं पचतीत्यादीनामपि सिद्धिः भवति। रथो गच्छतीत्यादौ तु उद्देश्यत्वारोपेण कर्मत्वं बोध्यम्। अत्रापि फलाश्रयत्वं फलतावच्छेदकसम्बन्धेन विवक्षितम्, तेन कालिकसम्बन्धेन फलाश्रये नातिव्याप्तिः।

अथ मैत्रो ग्रामं गच्छतीत्यादौ संयोगस्य द्विष्ठत्वेन यथा ग्रामः संयोगरूपफलाश्रयः, तथैव मैत्रोऽपि, ततश्च कर्तुः चैत्रस्यापि कर्मत्वापत्तिरिति तु नैव वक्तव्यम्, कारणं हि चैत्रादेः व्यापाराश्रयत्वेन कर्तृसंज्ञापि प्राप्ता, पुनः फलाश्रयत्वेन कर्मसंज्ञापि प्राप्ता, तत्र व्यापाराश्रयस्य चैत्रादेः परत्वात् कर्तृसंज्ञैव भवति न तु कर्मसंज्ञा, तस्मान्न दोष इति भावः। आत्मा आत्मानं हन्तीत्यादौ तु शरीरान्तःकरणरूपोपाधिभेदेनात्मनि भेदं सम्पाद्य कर्मत्वकर्तृत्वोपपादनं कर्तव्यमिति भावः।

अथ कर्मणः प्रोक्तलक्षणे स्वीकारे सति अग्नेर्माणवकं वारयति, इत्यादौ वारयतेः संयोगाद्यनुकूलव्यापाराभावानुकूलो व्यापारोऽर्थः। ततश्चात्र फलद्वयमेकं संयोगरूपम्, अपरं च व्यापाराभावरूपम्, ततश्च संयोगाश्रयत्वात् अग्नेः कर्मत्वं प्राप्तम्, व्यापाराभावरूपफलाश्रयत्वात् माणवकस्य च कर्मत्वं प्राप्तम्। एवं चोभयोः कर्मत्वप्रसक्तौ वारणार्थानामीप्सितः इति सूत्रमेतस्यापवादः स्यात्, ततश्च वारिधातुप्रयोगे कस्यापि न स्यात् कर्मसंज्ञा किन्तु चोभयोरपादानसंज्ञैव स्यात् इत्यप्यत्र नैव शङ्कनीयं कारणं ह्येतद्दोषवारणाय व्यापारे प्रधानत्वविशेषणं प्रदीयते। ततश्च लक्षणं भवति कर्तृवृत्तिप्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यव्यापारव्यधिकरणफलाश्रयत्वेन कर्तुरुद्देश्यत्वं कर्मत्वमिति ततश्च नैव तत्र दोषो भवति। कारणं वारयतेरर्थो भवति संयोगाद्यनुकूलव्यापाराभावानुकूलो व्यापारः, तत्र प्रधानीभूतो व्यापारः अन्तिमो व्यापारः, तत्प्रयोज्यं फलं व्यापाराभावरूपं फलम्, न

तु संयोगरूपम्, ततश्च व्यापाररूपफलाश्रयस्य माणवकस्यैव कर्मत्वं न तु संयोगरूपफलाश्रयस्याग्नेरपि, ततश्च संयोगाश्रयस्याग्नेः अपादानसंज्ञां विधाय वारणार्थानामीप्सतः सूत्रमिदं चरितार्थं भवति, एवं चापवादत्वाभावात्, माणवकस्य कर्मत्वं सिद्ध्यति। एवं चैत्रः मैत्रं ग्रामं गमयतीत्यादौ ग्रामादेः कर्मत्वाय जन्यत्वं विहाय प्रयोज्यत्वनिवेशः। प्रोक्तं च नागेशेन **''चैत्रं ग्रामं गमयतीत्यादौ ग्रामस्य कर्मत्वाय प्रयोज्यत्वनिवेशः। प्रयोज्यता च जन्याजन्यसाधारणी''**[18] ।

अथैवमपि चैत्रः माषेष्वश्वं बध्नातीत्यादौ माषाणां कर्मत्वं स्यात्, बन्धनप्रयोज्य-भक्षणाश्रयमाषाणामपि भक्षिधातुवाच्यगलविलाधःसंयोगरूपफलाश्रयत्वा-दित्यपि नैवात्र वक्तव्यम्, एतद्दोषवारणायैव फलेऽपि प्रकृतधात्वर्थेति विशेषणं प्रदीयते। ततश्च लक्षणं भवति कर्तृवृत्तिप्रकृत-धात्वर्थप्रधानीभूतव्यापारप्रयोज्यव्यापारव्यधिकरणप्रकृतधात्वर्थ-फलाश्रयत्वेन कर्तुरुद्देश्यत्वं कर्मत्वमिति। एवं च गलविलाधःसंयोगरूपस्य फलस्य प्रकृतबध्नातिधातुवाच्यत्वाभावात् न दोषः। अत एव प्रोक्तं नागेशेन **''माषेष्वश्वं बध्नातीत्यादौ बन्धनप्रयोज्यभक्षणादिश्रयमाषाणां तत्त्ववारणाय प्रकृतधात्वर्थेति फलस्यापि विशेषणम्''**[19] ।

**वैयाकरणसिद्धान्तमञ्जूषा-**

वैयाकरणसिद्धान्तमञ्जूषायां कर्मलक्षणं नगेशभट्टेन विस्तरेण सरलया च भाषया प्रतिपादितं वर्तते। तच्चातीवोपयोगी वर्तते गवेषकानां कृते। किन्तु वर्तमानसमये स ग्रन्थः सर्वत्र नैवोपलभ्यते। अत कर्मविषयकमूलग्रन्थ एवात्र लिख्यते। कारणं हि ग्रन्थस्य तात्पर्यमतीव सरलं वर्तते, तस्मात्तद्विषये व्याख्यानमपेक्षितं नास्ति। तथाहि - **''तत्र कर्मलक्षणबोधकं सूत्रम् कर्तुरीप्सिततमं कर्म** [पा सू 1-4-49] **इति। कर्तुरिति कर्तरि षष्ठी, आप्नोतेः सनन्तात् मतिबुद्धि** [पा सू 3-2-188] **इति सूत्रेण वर्तमाने क्तः, मतिरिच्छेति हि तत्राकरः।** एवञ्च कर्त्राप्तुमिष्यमाणं कर्मेत्यर्थः। आप्तिश्चात्र सम्बन्धः। तत्र कर्त्रा कर्मणः साक्षात् सम्बन्धस्यासम्भवात् क्रियाद्वारकः परम्परासम्बन्धो गृह्यते। कर्तृविशेषणतया तस्या उपस्थिततया उपस्थितपरित्यागेनानुपस्थितकल्पनायां मानाभावात्। एवञ्च कर्तृनिष्ठव्यापारेण सम्बन्द्धुमिष्यमाणमित्यर्थः। सम्बन्धश्च फलव्यापारयोः संसर्गतया भासमानो जन्यतादिरूपः, तत्फलाश्रयतारूपश्च। इष्यमाणत्वञ्च तद्व्यापारोद्देश्यत्वमेव। एतेन रथो ग्रामं गच्छति इत्यादौ कर्तुरचेतनत्वेन तत्रेच्छाया असम्भवात् तत्कर्मणः कर्तृगतेच्छाविषयत्वाभावेन कर्मत्वं न स्यादित्यपास्तम्। तदुपलक्षितोद्देश्यत्वस्य तत्रापि सत्त्वात्, तत्रोत्तरदेशसंयोगस्य रथादिव्यापारोद्देश्यत्वात्। भाष्यनये कूलं पिपतिषतीत्यादिवच्चेतनत्वारोपेण न क्षतिरित्याहुः।

तदुद्देश्यत्वञ्च साक्षात् फलरूपे धात्वर्थे क्रियायाः फलेच्छापूर्वकेच्छाविषयत्वेन फलस्य

सत्त्वात्। तत्र फले कर्मसंज्ञायाः फलाभावात् तदभिन्ने प्रवर्तते। यथा स्तोकं पचन्तीति। एवञ्च तत्राभिन्नोऽभेदो वा द्वितीयार्थः। फलाश्रयत्वात् तण्डुलादीनामप्युद्देश्यत्वम्। अत एव लः कर्मणि [3-4-69] इति सूत्रं संगच्छते। तत्र हि कर्तृसाहचर्येणाधात्वर्थकर्मण एव ग्रहणम्। अत एव विक्लित्यादिकर्मणि न लकारः। अत एव प्रयागात् काशीं गच्छति देवदत्ते प्रयागं गच्छतीति प्रयोगः, अन्यथा प्रयागस्यापि देवदत्तव्यापारजन्यविभागाश्रयत्वेन स दुर्वार एव। तस्य प्रकृतधात्वर्थोद्देश्यता तु नेति स्पष्टमेव। न च कालिकादिसम्बन्धेन फलाश्रयेऽतिव्याप्तिः, फलतावच्छेदकसम्बन्धेन फलाश्रयस्य ग्रहणात्। न च चैत्रो ग्रामं गच्छति, इत्यत्र ग्रामसंयोगादिरूपफलाश्रयचैत्रादेः कर्मत्वं स्यादिति वाच्यम्, परया कर्तृसंज्ञया बाधात्। ग्रामनिष्ठानुयोगिताया एव फलतावच्छेदकसम्बन्धत्वेन तेन सम्बन्धेन चैत्रे तदभावाच्च। अत एव आत्मानमात्मना हन्ति इत्यत्र शरीरमनोरूपावच्छेदकभेदेन कर्मत्वकर्तृत्वोपपादनं भाष्ये कृतम्। वृक्षाद् भूमौ पतति, इत्यत्र कर्तृकर्मद्वारा तद्विवक्षायामाधारत्वम्। साक्षात् तदाश्रयत्वविवक्षायां तु कर्मत्वं बोध्यम्। अत एव द्वितीया श्रित [3-4-69] इति समासविधानं संगच्छते। घटं करोति, इत्यत्रोत्पत्तिरूपधात्वर्थफलाश्रयत्वात् कर्मत्वम्, घटं जानाति इत्यादौ ज्ञानजन्यविषयावच्छिन्नाज्ञानभङ्गरूपफलशालित्वात् कर्मत्वम्। न चौवमपि नष्टे भाविनि च तं जानातीत्यनुपपन्नम्। तत्रापि सूक्ष्मरूपेण स्थित्यभ्युपगमात्, न्यायनये विषयताया अतीते कृतिस्वीकारवदावरणतद्भङ्गयोरपि वृत्तिस्वीकारे क्षत्यभावाच्च। यद्वा जानातीच्छतीत्यादौ ज्ञानेच्छाद्यनुकूलो व्यापारो धात्वर्थः। स च ज्ञानजनको मनश्चक्षुःसंयोगादिरेव। अत एव मनो जानाति, इत्यादयः प्रयोगाः संगच्छन्ते। इच्छानुकूलश्च ज्ञानादिः, फलतावच्छेदकसम्बन्धो विषयता। यद्वा विषयतानिरूपकज्ञानेच्छादिरेव व्यापारः। न च विषयताया ज्ञानाजन्यत्वेन कथं फलत्वम्, अनुपदवक्ष्यमाणफलत्वस्य तत्राऽपि सत्त्वेनाक्षतेः। नन्वत्र सूत्रे कर्तृग्रहणं किमर्थम्, तदभावेऽपि केनाप्तुमित्याकाङ्क्षायां कारकाधिकारात् प्रत्यासत्तिन्यायेन प्रकृतधात्वर्थलाभः। न चैवं कर्तुरपि कर्मत्वं स्यात्, परत्वात् कर्तृत्वेन बाधादिति चेत्, न, यतः संकोचे मानाभावेन फलावच्छिन्न-व्यापाररूपसंपूर्णधात्वर्थेनेप्सितस्य तण्डुलादेरेव कर्मत्वं स्यात्, न फलस्येति तस्यापि कर्मत्वाय तत्। अकिञ्च यवेभ्यो गां वारयति, अत्र पदानामपि कर्मत्वं स्यात्, तत्र भक्षणादिफलजनकव्यापारा-भावानुकूलो व्यापारो वारयतेरर्थः। न च वारणार्थानाम् [1-4-27] इति सूत्रं व्यर्थम्, अनुपदवक्ष्यमाणार्थान्तरवृत्तिवारयत्यादियोगे चारितार्थ्यात्। तद्धि सूत्रं विनिगमनाविरहादुभयत्रापि प्रवर्तते। कर्तृग्रहणे कृते तु न दोषः, कर्तृनिष्ठव्यापारजन्यफलानाश्रयात्वदित्याहुः। ननु तमब्ग्रहणं किमर्थमिति चेत्, पयसौदनं भुङ्क्ते इत्यादौ पयसः कर्मत्वव्यावृत्त्यर्थम्। न चात्र पयसो मृदुविशदत्वसंपादनरूप-स्वव्यापारजन्यसम्बन्धेन भुजधात्वर्थेऽन्वयविवक्षायाः सत्त्वेन फलाश्रयत्वविवक्षाया असत्त्वेन च

कथं तमब्ग्रहणाभावेऽपि द्वितीयाप्रसक्तिः, नहि युगपद्विवक्षाद्वयं कर्तुं शक्यमिति वाच्यम्, पञ्चक-प्रातिपदिकार्थपक्षे पयःशब्देनैवोभयं प्रतिपाद्यमिति विवक्षायाः सत्त्वेनादोपात्। पयोनिष्ठमृदुविशदत्त्व-सम्पादनरूपव्यापारजन्यपयोनिष्ठगलाधःकरणानुकूलव्यापार इति बोधात्, तत्र तमब्ग्रहणाभावे परत्वाद् द्वितीयैव स्यात्। परन्त्वत्र मुख्यतया भुजिक्रियोद्देश्यत्वमोदनस्यैव, न पयस इति बोध्यम्। न च तथायुक्तञ्चानीप्सितम् [1-4-50] इति कर्मत्वं पयसो दुर्वारम्, सर्वथानुद्देश्य एव तत्प्रवृत्तेः, अनीप्सितपदेन तथैव लाभात्। यदि तु तस्यापि मुख्यतया तत्त्वम्, तदा भवत्येव कर्मत्वमिति बोध्यम्। उद्देश्यतायां मुख्यत्वञ्च तद्धात्वर्थप्रकारेच्छाविशेष्यत्वे सति तद्धात्वर्थोपयुक्त-धर्मान्तरप्रकारकेच्छाविषयत्वाभाववत्त्वम्। प्रकृते च गलाधःकरणरूपफलाश्रयत्वप्रकारेच्छाविषयत्वेऽपि तदुपयुक्तमृदुविशदत्वसंवादकत्व-प्रकारेच्छाविषयत्वस्यापि सत्त्वान्न दोषः। सत्यन्ताभावे तु अग्नेर्माणवकं वारयति इत्यत्राग्नेरपि कर्मत्वापत्तिः। न च वारणार्थानाम् इत्यस्य वैयर्थ्यम्, प्रागुक्तार्थकवारयत्यादियोगे चारितार्थ्यात्। अत्र वारणं संयोगाभावानुकूलो व्यापारः। न च प्रवृत्तिविघातो वारणमिति वृत्त्यादिविरोधः, धातूनामनेकार्थत्वात्। मम त्वग्नेः संयोगाभावप्रकारकेच्छाविशेष्यत्वाभावान्न दोषः। न ह्यग्निर्माण-वकसंयुक्तो मा भवत्विति इच्छा, अपि तु माणवकोऽग्निसंयुक्तो मा भवत्विति। ध्वनितञ्चेदमत्रैव भाष्ये। **''एवञ्च धात्वर्थतावच्छेदकफलम् कर्तृव्यापार-प्रयोज्यफलतावच्छेदकसम्बन्धेन धत्वर्थफलाश्रयश्चौतदन्यतरत्वं कर्मत्वमित्येतत्सूत्रनिष्कर्षः''**[20] ।

**अत्रायं निकर्षः-**

नागेशभट्टनये सर्वकर्मविहितद्वितीयादीनां कर्मत्वशक्तिमान् अर्थः, क्रियाकर्मभावसम्बन्धश्च तदर्थः। यतोहि नागेशभट्टस्य तात्पर्यं वर्तते, यत्कर्मसंज्ञाविधायकैः सर्वैरेव सूत्रैः तत्र तत्र स्वोद्देश्ये कर्मत्वशक्तिमत्त्वं बोध्यते। ततश्च कर्मणि द्वितीय इति सूत्रेण कर्मणि द्वितीया भवति। अतः सर्वत्रैकरूपतासाधनार्थं कर्ममात्रविहितद्वितीयायाः कर्मत्वशक्तिमान् अर्थः। अत्र गुरुचरणाः पुरुषोत्तमत्रिपाठिनः पाठयन्ति स्म अस्मान्। कर्मत्वशक्तिमान् द्वितीया द्योत्योर्थः क्रियाकारकभाव-सम्बन्धश्च वाच्योर्थः द्विताया।

मैत्रो ग्रामं गच्छति। अत्रान्वयबोधप्रकारः प्रस्तूयते- मैत्रो ग्रामं गच्छति- इत्यत्र गमिधातोः संयोगः पादविक्षेपादिव्यापारश्चार्थः। तिप्रत्ययस्य एकत्वं कर्ता, चार्थः। अम्प्रत्ययस्य कर्मत्वशक्तिमान् क्रियाकर्मभावसम्बन्धश्चार्थः। तत्र तिबर्थस्यैकत्वस्य तदर्थे कर्तरि अन्वयः तत्रैव च मैत्रस्याभेदेनान्वयः। कर्तुश्च क्रियाकर्तृभावसम्बन्धेन धात्वर्थव्यापारे अन्वयः। अमर्थस्यैकत्वस्य तदर्थे कर्मत्वशक्तिमति अन्वयः, तत्रैव च ग्रामस्याभेदेनान्वयः। कर्मणस्तु धात्वर्थे संयोगे क्रियाकर्मभावसम्बन्धेनान्वयः।

संयोगस्य च व्यापारे जन्यजनकभावसम्बन्धेनान्वयः। ततश्च वाक्यात् अभेदसम्बन्धावच्छिन्न-चैत्रत्वावच्छिन्नमैत्रनिष्ठप्रकारतानिरुपितक्रियाकर्तृ-भावसम्बन्धावच्छिन्नकर्तृत्वशक्तिमन्निष्ठ-प्रकारतानिरूपिता या विशेष्यता तद्वान्, अथ च अभेदसम्बन्धावच्छिन्नग्रामत्वावच्छिन्नग्रामनिष्ठ-प्रकारतानिरूपितक्रियाकर्मभावसम्बन्धावच्छिन्न-कर्मत्वशक्तिमन्निष्ठ-प्रकारतानिरूपितजन्यजनक-भावसम्बन्धावच्छिन्नसंयोगत्वावच्छिन्नसंयोगनिष्ठप्रकारतानिरूपिता च या विशेष्यता तद्वान् व्यापार इति शाब्दबोधः। चैत्राभिन्नैककर्तृकः ग्रामाभिन्नैककर्मकः संयोगानुकूलव्यापार इति भावः। कर्मभेद: कर्म द्विविधं वर्तते। ईप्सिततमम्, अनीप्सितं चेति। तत्र ईप्सिततमं कर्म त्रिविधं वर्तते, निर्वर्त्यं विकार्यं प्राप्यं चेति। अनीप्सितं च कर्म चतुर्विधं वर्तते- उदासीनं, द्वेष्यं, संज्ञान्तरैरनाख्यातम्, अन्यपूर्वकं चेति। अत एव एतत्सर्वं संगृह्य प्रोक्तं भर्तृहरिणा-

**निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।**
**तच्चेप्सिततमं कर्म चतुर्द्धान्यत्तु कल्पितम्।**
**औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।**
**संज्ञान्तरैरनाख्यातं यद्यच्चाप्यन्यपूर्वकम्॥**

**निर्वर्त्यम्**= निर्वर्त्यकर्मत्वं नाम- अविवक्षितप्रकृतिविकृतिभावकत्वे सति क्रियाविशिष्टोत्पत्त्या-श्रयत्वेन विवक्षितत्वम्, वैशिट्यञ्च स्वप्रयोज्यत्व-स्ववाचकधातुवाच्यत्वोभयसम्बन्धेन। यथा कुम्भकारः घटं करोति, इत्यादौ घटादीनां निर्वर्त्यकर्मत्वं बोध्यम्। तथा हि- घटनिष्ठोत्पत्तिः क्रिया विशिष्टा वर्तते, स्वं कुम्भकारनिष्ठा व्यापाररूपा क्रिया तत्प्रयोज्यत्वं घटनिष्ठोत्पत्तौ वर्तते, कुम्भकारीयव्यापारेणैव घटोत्पत्तेः। किञ्च स्वं क्रिया तद्वाचको धातुः कृञ् तद्वाच्यत्वमपि उत्पत्तौ वर्तते, फलव्यापारयोरुभयोरपि धातुवाच्यत्वात्। किञ्च घटः कस्याश्चिदपि प्रकृतेः विकृतिरूपेण विवक्षितो नास्ति। एवं च घटः अविवक्षितप्रकृतिविकृतिभावकः क्रियाविशिष्टोत्पत्त्याश्रश्च वर्तते, अतः घटो निर्वर्त्यं कर्मेति भावः।

**विकार्यम्**= विकार्यकर्मत्वं च - निर्वर्त्यभिन्नत्वे सति क्रियावृतविशेषधर्मवत्त्वेन ज्ञायमानत्वम्। यथा काष्ठं भस्म करोति, इत्यादौ बोध्यम्। इत्यत्र निर्वर्त्यभिन्नमपि भस्म वर्तते, किञ्च तत्र क्रियाकृतविशेषस्यापि ज्ञानं भवति, अतः क्रियाकृतविशेषधर्मवत्त्वेन जायमानत्वमपि वर्तते, अतः भस्म विकार्यं कर्म वर्तते। अत्र लक्षणे घटं करोतीत्यादौ निर्वर्त्ये दोषवारणाय निर्वर्त्यभिन्नत्वे सतीति प्रदत्तमस्ति। घटं पश्यतीत्यादौ प्राप्यकर्मणि अतिव्याप्तिवारणाय विशेष्यदलम्-

**प्राप्यकर्मत्वम्** = प्राप्यकर्मत्वं च- क्रियाकृतविशेषानुपलभ्यमानत्वम्। अनुपलभ्यमानः क्रियाकृतविशेषो यत्रेति बहुव्रीहिः। तथा च यद्धातुकर्मणि प्रायः क्रियाकृतविशेषो नैवोपलभ्यते

तद्धातुकर्मप्राप्यं कर्मेति फलितम्। यथा ग्रामं गच्छति इत्यादौ ग्रामादीनां बोध्यमिति भावः।

**अनीप्सितकर्मणः लक्षणम्** = फलाश्रयत्वे सति फलाश्रयत्वोद्देश्यत्वेनाविवक्षितम् कर्तुरनीप्सितमिति–

**उदासीनम्** = तत्त्वं चेच्छोद्देश्यत्वाभाववत्त्वम्- तृणं स्पृशति।

**द्वेष्यम्** = तत्त्वं चेच्छोद्देश्यीभूताभावप्रतियोगित्त्वम्- विषं भुङ्क्ते।

**संज्ञान्तरैरनाख्यातम्** =अपादानत्वादितत्तद्रूमविशेषैरविवक्षितम्-गां दोग्धि पयः इत्यादि।

**अन्यपूर्वकम्**=स्वान्तरप्राप्तसंज्ञान्तरबाधकशास्त्रप्रयोज्यकर्मसंज्ञकम्-क्रूरमभिक्रुद्ध्यति इत्यादि।

**इति द्वितीयार्थविचारः।**

**सन्दर्भग्रन्थः-**


1. अम्बाकर्त्रीयुतवाक्यपदीयतृतीयकाण्डद्वितीयभागपत्रसंख्या 426/ प्रकाशनवर्षम् 1997/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी।
2. अम्बाकर्त्रीयुतवाक्यपदीयतृतीयकाण्डद्वितीयभागपत्रसंख्या 426/ प्रकाशनवर्षम् 1997/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः वाराणसी।
3. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1205/ प्रकाशनवर्षम्-2006/ प्रकाशकः राष्ट्रियसंस्कृतसंस्थानम्।
4. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1208/ प्रकाशनवर्षम्-2006/ प्रकाशकः राष्ट्रियसंस्कृतसंस्थानम्।
5. वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या 151/ प्रकाशनवर्षम्-1977/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।
6. दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या 445/ प्रकाशनवर्षम्-2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
7. बृहच्छब्देन्दुशब्देन्दुशेखरद्वितीयभागपत्रसंख्या-802/ प्रकाशनम्-1998/प्रकाशकः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी।
8. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 162/ प्रकाशनवर्षम्-2006/ प्रकाशकः चौखम्बाविद्याभवनम्, वाराणसी।
9. दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या 443/ प्रकाशनवर्षम्-2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
10. दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या 437/ प्रकाशनवर्षम्-2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
11. बृहच्छब्देन्दुशब्देन्दुशेखरद्वितीयभागपत्रसंख्या 801/ प्रकाशनवर्षम्-1998/ प्रकाशकः सम्पूर्णानन्दसंस्कृत-विश्वविद्यालयः, वाराणसी।
12. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 164/ प्रकाशनवर्षम्-2006/ प्रकाशकः चौखम्बाविद्याभवनम्, वाराणसी।

13. दीपिकाटीकायुतलघुशब्देन्दुशेखरपत्रसंख्या 444/ प्रकाशनवर्षम्-2007/ प्रकाशकः चौखम्बाप्रकाशनम्, वाराणसी।
14. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 165/ प्रकाशनवर्षम्-2006/ प्रकाशकः चौखम्बाविद्याभवनम्, वाराणसी।
15. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 165/ प्रकाशनवर्षम्-2006/ प्रकाशकः चौखम्बाविद्याभवनम्, वाराणसी।
16. वंशीटीकायुतापरमलघुमञ्जूषापत्रसंख्या 165/ प्रकाशनवर्षम्-2006/ प्रकाशकः चौखम्बाविद्याभवनम्, वाराणसी।
17. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1201/ प्रकाशनवर्षम्-2006/ प्रकाशकः राष्ट्रियसंस्कृतसंस्थानम् नईदिल्ली।
18. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1203/ प्रकाशनवर्षम्-2006/ प्रकाशकः राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली।
19. वैयाकरणसिद्धान्तलघुमञ्जूषापत्रसंख्या 1204/ प्रकाशनवर्षम्-2006/ प्रकाशकः राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली।
20. वैयाकरणसिद्धान्तमञ्जूषापत्रसंख्या 150/ प्रकाशनवर्षम्-1977/ प्रकाशकः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी।

**- व्याकरणविभागः**

**सम्पूर्णानन्दसंकृतविश्वविद्यालयः वाराणसी**

******

# उत्तर प्रदेश संस्कृत संस्थान, लखनऊ द्वारा प्रकाशित पुस्तकों की सूची

| क्र.सं. | पुस्तक का नाम | लेखक/संपादक | मूल्य |
|---|---|---|---|
| | संस्कृत वाङ्मय का बृहद् इतिहास (अट्ठारह खण्ड) पद्मभूषण आचार्य श्री बलदेव उपाध्याय | | |
| 1. | वेद खण्ड (प्रथम) | प्रो० व्रजबिहारी चौबे | 360.00 |
| 2. | वेदाङ्ग खण्ड (द्वितीय) | प्रो० ओम प्रकाशपाण्डेय | 425.00 |
| 3. | आर्षकाव्य खण्ड (तृतीय) | प्रो० भोलाशंकर व्यास | 750.00 |
| 4. | काव्य खण्ड (चतुर्थ) | प्रो० राधावल्लभ त्रिपाठी | 650.00 |
| 5. | गद्य (चम्पू) खण्ड (पंचम) | प्रो० जयमन्त मिश्र | 300.00 |
| 6. | नाट्य शास्त्र (षष्टम् खण्ड) | प्रो० कमलेश दत्त त्रिपाठी | 630.00 |
| 7. | आधुनिक संस्कृत साहित्य का इतिहास (सप्तम) द्वितीय संस्करण | प्रो० जगन्नाथ पाठक | 500.00 |
| 8. | काव्यशास्त्र (अष्टम) | पं० करूणापति त्रिपाठी | 750.00 |
| 9. | न्याय खण्ड (नवम) | प्रो० गजानन शास्त्री मुसलगांवकर | 470.00 |
| 10. | वेदान्त खण्ड (दशम) | प्रो० संगम लाल पाण्डेय | 580.00 |
| 11. | तन्त्रागम खण्ड (एकादश) | प्रो० ब्रजवल्लभ द्विवेदी | 650.00 |
| 12. | जैन–बौद्ध–चार्वाक दर्शन (द्वादश खण्ड) | प्रो० रामशंकर त्रिपाठी | 360.00 |
| 13. | पुराण खण्ड (त्रयोदश) | प्रो० फूलचन्द जैन | 425.00 |
| 14. | व्याकरण खण्ड (पंचदश) | प्रो० गंगाधर पाण्डा | 300.00 |
| 15. | ज्योतिष खण्ड (षोडश) | प्रो० राम चन्द पाण्डेय | 400.00 |
| 16. | आयुर्वेद खण्ड (सप्तदश) | प्रो० रामनाथ द्विवेदी | 340.00 |
| 17. | प्रकीर्ण खण्ड (अष्टादश) | प्रो० श्री किशोर मिश्र | 400.00 |
| 18. | सरल संस्कृतम् | श्री प्रयागदत्त चतुर्वेदी | 65.00 |
| 19. | स्तुतिमणि माला (प्रथम-द्वितीय) | आचार्य करूणापति त्रिपाठी | 40.00 |
| 20. | दावानल | डॉ० श्रीनाथ हसूरकर | 113.00 |
| 21. | नदीयात्राकथा | आचार्य करूणापति त्रिपाठी | 125.00 |
| 22. | संस्कृत प्रभा | डॉ० कपिलदेव द्विवेदी | 110.00 |
| 23. | पाणिनि तथा संस्कृत के अन्य–अल्पज्ञात कवियों की रचनायें | डॉ० प्रभात शास्त्री | 150.00 |
| 24. | संक्षिप्त महाभारत (प्रथम खण्ड) | आचार्य करूणापति त्रिपाठी | 350.00 |
| 25. | संक्षिप्त महाभारत (द्वितीय खण्ड) | डॉ० प्रभुनाथ द्विवेदी | 350.00 |
| 26. | (क) कालिदास–ग्रन्थावली | आचार्य सीताराम चतुर्वेदी | 460.00 |
| 27. | (ख) कालिदास–ग्रन्थावली (नवीन अष्टम संस्करण) | आचार्य सीताराम चतुर्वेदी | 580.00 |
| 28. | कविजंयति–वाल्मीकि | आनन्द कुमार श्रीवास्तव | 200.00 |
| 29. | पौरोहित्यकर्मप्रशिक्षक | डॉ० सच्चिदानन्द पाठक | 270.00 |
| 30. | भारतीयसंस्कृति की वैज्ञानिकता | डॉ० उमारमण झा | 280.00 |
| 31. | व्यावहारिक संस्कृत प्रशिक्षक | डॉ० सच्चिदानन्द पाठक | 150.00 |
| 32. | पाण्डुलिपि विवरणिका | डॉ० सच्चिदानन्द पाठक | 400.00 |
| 33. | साहित्य रत्न मंजूषा | डॉ० रमाकान्त झा | 180.00 |
| 34. | व्यास वैभव | प्रो० गंगाधर पण्डा | 300.00 |
| 35. | श्री विद्या साधना–प्रथम भाग | सत्येन्द्र सिंह | 300.00 |
| 36. | श्री विद्या साधना–द्वितीय भाग | सत्येन्द्र सिंह | 250.00 |
| 37. | पाणिनि प्रवेशिका | डॉ० प्रमोद शर्मा | 170.00 |
| 38. | ज्योतिष शास्त्र प्रशिक्षक | डॉ० गिरिजाशंकर शास्त्री | 250.00 |
| 39. | अथ पचांग ज्ञानम् | श्री सत्यप्रकाश द्विवेदी | 110.00 |
| 40. | ज्योतिष और वनस्पतियाँ | श्री सत्यप्रकाश द्विवेदी | 100.00 |
| 41. | आहार ज्योतिष | श्री सत्यप्रकाश द्विवेदी | 100.00 |
| 42. | लग्नचन्द्रिका | डॉ० अनिल पोरवाल | 200.00 |
| 43. | व्रत एवं त्यौहार निर्णय | श्री सत्यप्रकाश द्विवेदी | 170.00 |
| 44. | विप्लवकः कलिकाली तथाकन्या | प्रो० ओम प्रकाशपाण्डेय | 200.00 |
| 45. | भारतीय काव्यशास्त्रीय सौन्दर्य मीमांसा: सिद्धान्त एवं दर्शन | डॉ० वन्दना शुक्ला | 500.00 |
| 46. | श्रीमद्भागवत महापुराण (प्रथम भाग) | प्रो० आजाद मिश्र | 730.00 |
| 47. | श्रीमद्भागवत महापुराण (द्वितीय भाग) | प्रो० आजाद मिश्र | 340.00 |
| 48. | श्रीमद्भागवत महापुराण (तृतीय भाग) | प्रो.० आजाद मिश्र | 1100.00 |
| 49. | कैलासमानसरोवराभिनन्दनम् | डॉ० तारादत्त | 1150.00 |
| 50. | शतपथ ब्राह्मण (तृतीय खण्ड) | प्रो० सोमदेव शतांशु | 430.00 |
| 51. | प्रसन्न भारतीय | डॉ. शरदिन्दु कुमार त्रिपाठी | 400.00 |
| 52. | श्रीमद्भागवत महापुराण (प्रथम भाग) | प्रो० आजाद मिश्र | 730.00 |
| 53. | श्रीमद्भागवत महापुराण (द्वितीय भाग) | प्रो० आजाद मिश्र | 340.00 |
| 54. | श्रीमद्भागवत महापुराण (तृतीय भाग) | प्रो० आजाद मिश्र | 1100.00 |
| 55. | कैलास मानसरोवराभिनन्दनम् | डॉ० तारादत्त | 1150.00 |
| 56. | शतपथ ब्राह्मण (तृतीय खण्ड) | प्रो० सोमदेव शतांशु | 430.00 |
| 57. | आचार्य वासुदेव द्विवेदी ग्रन्थावली प्रसन्न भारती (प्रथम भाग) | डॉ० शरदिन्दु कुमार त्रिपाठी | 400.00 |
| | **दुर्लभग्रन्थ** | | |
| 58. | विद्वच्चरित पंचकम् | नारायणशास्त्री खिस्ते | 60.00 |
| 53. | अद्वैत सिद्धिः (प्रथम भाग) | गुरु चन्द्रिका टीका | 100.00 |
| 59. | अद्वैत सिद्धिः (द्वितीय भाग) | गुरु चन्द्रिका टीका | 100.00 |
| 60. | अद्वैत सिद्धिः (तृतीय भाग) | गुरु चन्द्रिका टीका | 80.00 |
| 61. | तन्त्र समुच्चयः (प्रथम भाग) विवरणाख्या–व्याख्या समेत | शंकर प्रभृति विमर्शिनी आख्या | 100.00 |
| 62. | तन्त्र समुच्चयः (द्वितीय भाग) विवरणाख्या–व्याख्या समेत | शंकर प्रभृति विमर्शिनी आख्या | 100.00 |
| 63. | पंचदशी | रामकृष्ण | 152.00 |
| 64. | सदुक्ति कर्णामृतम् | म०म० रामौतार शर्मा | 120.0[illegible] |
| 65. | श्रीमद्वाल्मीकि रामायण (प्रथम भाग) | श्री गोविन्दराजीय व्याख्या तिलक | 220.[illegible] |
| 66. | श्रीमद्वाल्मीकि रामायण (द्वितीय भाग) | श्री गोविन्दराजीय व्याख्या तिलक | 180.[illegible] |
| 67. | श्रीमद्वाल्मीकि रामायण (तृतीय भाग) | श्री गोविन्दराजीय व्याख्या तिलक | 220.[illegible] |
| 68. | श्रीमद्वाल्मीकि रामायण (चतुर्थ भाग) | श्री गोविन्दराजीय व्याख्या तिलक | 12[illegible] |
| 69. | मन्त्ररामायण | डॉ० प्रभुनाथ द्विवेदी | 7[illegible] |
| 70. | धातुरूप–निदर्शनम् | पं० वासुदेव द्विवेदी शास्त्री | 17[illegible] |
| 71. | नैषधीय–चरितम् (प्रथम भाग) | नारायणशास्त्री खिस्ते | 1[illegible] |
| 72. | नैषधीय–चरितम् (द्वितीय भाग) | नारायणशास्त्री खिस्ते | 1[illegible] |
| | **बाल साहित्य** | | |
| 73. | भारतीय स्वतंत्रता संघर्ष गाथा | डॉ० सत्यदेव चौधरी | 4[illegible] |
| 74. | कथामन्दाकिनी | डॉ० ओम प्रकाश ठाकुर | 8[illegible] |
| 75. | बालकथा कौमुदी | डॉ० विश्वास | 160.00 |
| 76. | बाल वाटिका | डॉ० विश्वास | 100.00 |
| | **पत्रिकाएँ** | | |
| 77. | संस्कृत वाङ्मये महिलानां स्थानं योगदानंच | डॉ० नवलता | 10.00 |
| 78. | व्याकरण दर्शन विमर्श | डॉ० विजय कर्ण | 10.00 |
| 79. | परिशीलनम् षाण्मासिकी संस्कृतानुसंधान पत्रिका | | 50.00 |
| 80. | पालि परिशीलनम् | डॉ० अखिलेश कुमार चौबे | 25.00 |
| 81. | बाल संस्कृतम् (बाल पत्रिका) मासिक | | 25.00 |

UGC Approved, Journal No. 49321
Impact Factor : 2.591

ISSN : 0976-6650

# शोध दृष्टि

## Shodh Drishti

An International Peer Reviewed Refereed Research Journal

ol. 10, No. 6

June, 2019

PEER REVIEWED JOURNAL